
काव्यपरीक्षा

३५५

परीक्ष्यज्ञोकान्न परितोदिशाश्च

एतत्कुचस्यर्द्दितया घटस्य स्थानस्यचा
स्त्वस्य निदर्शनत्वं॥ तस्माच्छ्रीविल्याम्र
टीकादिकारी प्रसिद्धनामाऽजनि
कुलकारः



१८८



कालपावकसन्निभां कलितार्धचंद्रशिरोरुहां

॥ ॥ श्री गुरुगणाधीशशारदाभ्यो नमः ॥ ॥ पद्मापदाटवीनाथस्वस्वस्थानप

काव्यमधुनः परीक्षायां प्रवर्त्तते ॥१॥ इह तावत्परीक्षि

दषट्पदः ॥ वागीशः काव्यमधुनः परीक्षायामुद्यमः । तत्रादौ काव्यं रूपमाह ॥

तमेव काव्यं फलाय भवतीति तत्परीक्षायामुद्यमः ॥ सालंकारगुणादोषौ शब्दार्थौ

काव्यमास्वादजीवातुः पदसंदर्भ उच्यते ॥ सालंकारगुणादोषौ शब्दार्थौ का

व्यं करोति काव्यं पठति श्रृणोतीत्यादि व्यवहारादिति कैश्चन ॥ काव्यं करोति काव्यं पठति

विति कैश्चन ॥ आस्वादव्यंजकत्वमेव काव्यत्वप्रयोज

कमेव काव्यमिति प्राचः । केचित्तु आस्वादव्यंजकत्वमेव काव्यत्वं । काव्यं करोतीत्या

के तत्तु शब्दे चार्थे वा विशिष्टमिति शब्देऽर्थे पि काव्यत्वं । काव्यं करोतीत्या

दौ काव्यपदस्य शब्दमात्रपरत्वमित्याहुः । अथादोषाविति । किं यत्किंचिद्दोषा

भावो यावद्दोषाभावो वा । नाद्यः अव्यावर्त्तकत्वात् यत्किंचिद्दोषाभावस्य स

र्वत्रसुलभत्वात् । नांत्यस्तथासति काव्यलक्षणं निर्विषयं विरलविषयं वा स्या

क

तदिति चेदुच्यते। दुष्टेष्वपि रसोद्बोधात् काव्यत्व[illegible]दर्शनाद्दोषा विलि
काव्यलक्षणे नैदेयमेव। किंतु यत्नतो दोषाभावः काव्ये कर्त्तव्य इत्येतावन्मा
त्रमिति टीकाकृतः। तदुक्तं। कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि
मता यत्र रसाद्यनुगमः स्फुट इति। अन्ये तु एकस्मिन्नेव पद्ये यदंशे दोषाभाव
स्तदंशे काव्यत्वं यदंशे दोषस्तदंशेऽकाव्यत्वं। तथा चैकस्मिन्नेव पद्ये काव्यमका
व्यं च। यथैकमेव ज्ञानं प्रमा चाप्रमा चेति दोषसामान्याभाव एव लक्षणे प्रवे
श्य इत्याहुः। अत्र विशेषालंकारविरहेऽपि सामान्यालंकारसत्वान्न काव्यहा ख४
निरिति स्मर्त्तव्यं। यथा। यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चो
न्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः। सा चैवास्मि तथापि तत्र सु
रतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते। अत्र वक्रो

तरु

क्तिर्नाम महासामान्यालंकारः सत्वादेव काव्यत्वं। तदुक्तं। सेषा सर्वत्र वक्रोक्तिरनयार्थो
[illegible] विभाव्यते। यत्नोस्यां कविना कार्यः कोलंकारोनया विना॥ तथा वक्रोक्तिः
काव्यजीवितमिति। वक्रोक्तिश्चमत्कारि एवोक्तिरित्यर्थः॥ अत्र रसस्य हि प्राधान्या
न्नालंकारता। इदानीं शब्दार्थयोः स्वरूपमभिधातुं तयोर्विभागमाह। स्याद्वाच
को लाक्षणिकः शब्दोत्र व्यंजकस्त्रिधा। अत्रेति काव्ये। एषामर्थास्तथा वाच्यलक्ष्य
व्यंग्याः इति त्रयः॥ अथ वाचकादीनां स्वरूपमाह। शक्तिमत्वं वाचकत्वं शक्तिर्जातौ प
रं मता। ईश्वरेच्छाविशेषोथ पदार्थांतरमेव सा। यत्र यस्य शक्तिस्तत्र तस्य वाचक
त्वमित्यर्थः॥ यद्यप्यर्थक्रियाकारितया व्यक्तावपि शक्तिर्युज्यते तथापि जाता
वेव शक्तिर्न तद्विशिष्टायां व्यक्तौ। गौरवादानंत्याद्व्यभिचाराच्च। यत्र त्वानंत्यव्य
भिचारौ न स्तस्तत्राकाशादिपदे व्यक्तावेव शक्तिः॥ जातिविशिष्टव्यक्तिबोधकत्वे
जातिशक्तं पदं जातिविशिष्टं बोधयतीति कार्यकारणभावकल्पनया लक्षणया

तथासति स्वरूपयोग्यतावच्छेदकस्य कस्यचिद्धर्मस्य व्य(न)त्वे शैत्यपावनत्वादिरंगीकरणी-
यएवेति चेन्न। जनकत्वस्य पदार्थान्तरस्यैवांगीकारात्। एवं लक्षणयापि व्यंजनान्यथा-
सिद्धिर्निरस्ता। अपिच। यद्यपि शैत्यपावनत्वादौ तात्पर्यानुपपत्त्या लक्षणा नवितुम-
र्हति तथापि रूढिप्रयोजनयोरन्यतराभावान्न तथेति दिक्। अथ पावनत्वादियुक्तमेव
तटं लक्ष्यतां गंगायास्तटे घोष इत्यतोऽधिकार्थस्य प्रतिपत्तिः प्रयोजनमिति विशि-
ष्टे लक्षणास्तु किं व्यंजनयेति चेन्न। ज्ञानस्य विषयफलयोरैक्याभावात्। तदुक्तं। ज्ञा-
नस्य विषयो ह्यन्यः फलमन्यदुदाहृतमिति। विशिष्टेन सममेकस्य शक्यसंबंधस्या-
भावाच्च। लक्षणाद्वयांगीकारे तु यथा शैत्याद्युपस्थितिः सैव व्यंजना। बाधितबोधक-
त्वेन लक्षणातो वैलक्षण्यादित्युक्तमेव। अथानुमानेनैव व्यंजनान्यथासिद्धा स्या-
दिति तृतीयः पक्षः स्यात्। तथाहि। भम धम्मिअ वीसत्थो सो सुणहो अज्ज मारिउ ते-
ण गोलाणइकच्छकुडंगवासिणा दरिअसीहेण। इत्यत्र गृहे न यहे तु भ्रमनिवृत्त्यानु-
मानविधानेन गोदावरीतीरस्य भीरुभ्रमणायोग्यत्वं सिंहवत्त्वेन व्याप्यं। तत्तु गोदा-

वरीतीरं नीरूपमाणायोग्यं सिद्धवत्त्वात् । यन्नैवं तन्नैवं यथा गगनमित्यनुमानेनैव सेत्स्य
ति किं व्यंजनयेति चेन्न । नीरूपरपितु रोः प्रत्नो वा निर्देशेन प्रियानुरागेण वा न्वमतीति व्य
भिचारात् । न च प्रत्नु निर्देशाद्युपाधिकृतत्वेन न्वमणं विशेषणीयमिति वाच्यं व्यभिचार इति
चेन्न । एवं ह्यनुमानेन व्यंजनान्यथासिद्धौ शब्दप्रामाण्यमपि न सिध्येत् । तथा हि । घटमानये
त्यत्र कर्मत्वं घटवत् । घटनिरूपिताकांक्षायोग्यतादिमत्पदस्मारितत्वादित्यनुमानेन शा
ब्दबोधसमानाकारज्ञानजननसंभवात् । न च कथं योग्यताया लिंगविशेषणत्वं तस्याः
संशयसाधारणज्ञानस्य कारणत्वात् । हेतुनिश्चयकारणत्वस्य सर्वसंमतत्वादिति वाच्यं प
तोनुमितित्वावच्छिन्नं प्रति हेतुनिश्चयत्वेन कारणतानसंभवत्येव । अनुगतस्य हेतुत्वस्या
भावात् । किंतु प्रत्येकं धूमादिनिश्चयत्वेन । तथान्यस्य निश्चयत्वेन कारणतायामपि यो
ग्यताज्ञानस्य ज्ञानत्वेनैव कारणत्वमिति को दोष इति । अथ शब्दस्थाने व्याप्त्यादिप्रतिसंधा
नं विनापि प्रत्यक्षाद्यवगते पक्षतो परागं विनापि अस्यं ता सत्यप्यर्थे बाधावतारे पन्न्वय
बोधदर्शनान्नानुमानेन शब्दप्रामाण्यान्यथासिद्धिरिति चेत् । समं ममपीति दिक् । नवीना
स्तु । व्यंजनेनैवानुमानमन्यथासिद्धं न वत्ति निवैपरीत्यमेव युज्यते । एवं हि लाघवमपि म

वे०

स्मिन्सा स्यात्साध्यवसानिका। विषयिण आरोप्यमाणेन। अन्यस्मिन्नारोपवि
षये। अंतःकृते विषयनिष्ठासाधारणधर्मग्रहं विनास्वतादात्म्येन प्रत्यायिते। सा
लक्षणा साध्यवसानिका स्यादित्यन्वयः। विषयनिष्ठासाधारणधर्माग्रहस्य
गौरेवायमित्यत्र गौरित्यत्रापि च स्यात्। तेनैं विधोभयरूपा साध्यवसानिका न
वतीति ध्येयं। भेदाविमोचसादृश्यात्संबंधांतरतस्तथा। गौणो भुद्धौ च विज्ञेयौ
तेन गौण्या लक्षणायामेवांतर्भाव इति मंतव्यं। सादृश्यं सजातीयधर्मत्वं। सएव
संबंधः। तत्वं च स्वसमवेतसमवेतसमवायिसमवायित्वं। यथा गौर्वाहिकः। गौ
रेवायमित्यत्र च। अत्र गौणभेदयोस्ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्र
योजनं। अत्र गोसादृश्यं लक्ष्यतावच्छेदकं तेनैव प्रकारेण गोशब्देन वाहीको बो
ध्यत इति केचित्। अन्ये मते गौरिव वाहीक इत्यत्र रूपके तद्गतभूयोधर्मवत्त्वमा
त्रं प्रकार इत्यनयोर्भेद इति। अत एव उपमेव तिरोभूतभेदा रूपकमिष्यत इत्य

॥६

इत्यत्रोपमायां भिन्न येसन्नितद्गतभूयोधर्मवत्त्वं प्रकारः गौर्वाहीक २

कैः। अन्ये तु गोत्वेनैव गोशब्देन वाहीको बोध्यते तथा मुखं चंद्र इत्यादावपि चंद्रत्वे
नैव मुखादि प्रतीतिरित्याहुः। न चायोग्यताज्ञानात्कथमेतादृशी धीरिति वाच्यं। अ
यतायामप्यर्थे ज्ञानं शब्दः करोतीति न्यायात्। आहार्यारोपाद्वा। सादृश्यादन्य
त्कार्यकारणभावसंबंधांतरं। यथा आयुर्घृतं आयुरेवेदमिति च। अनयोरन्यवै
लक्षण्येनाव्यभिचारेण च तत्कार्यकारित्वं फलं। एवमन्यत्रापि। उक्ता या लक्षणा
यः प्रवर्तते स लाक्षणिकः शब्दः। अथ व्यंजको निरूप्यते। तत्र व्यंजनायां बहवो वि
प्रतिपद्यंते। तथाहि। केचिद्वदंति यत्परः शब्दः स शब्दार्थ इति न्यायाद्वाच्यार्थशक्तेर
व किंचिद्व्यंजनमपेयेति। अपरे तु। लक्षणयैव व्यंजना यथा सिद्धा। तार्किकास्त्वनुमानेने
ति। तत्र नाद्यः। यतो यत्परः शब्द इत्यादेर्यदंशे विधेयत्वं तत्रैव तात्पर्यं प्रमाणं चेत्सुपा
तस्यैव शब्दस्य विधेयार्थे तात्पर्यमित्येवार्थो न तु शब्दश्रवणानंतरं प्रतीतमात्रे।
यथा दध्ना जुहोतीत्यत्र हवनस्यान्यतः सिद्धेर्दध्यादेः करणत्वे। एवं हि लक्षणाया
अपि वैकल्यं स्यात्। अथान्यत्र यथा तथा तत्रास्तु। न ग्रामे नो दुरधिरोहतनोर्वि

शालवंशोन्नतेः कृतशिलीमुखसंग्रहस्यायस्यानुपप्लुतगतेः परवारणस्य दा
नांबुसेकसुभगः सततं करोन्मेत्त इत्यादौ द्वितीयार्थे गजरूपेऽभिधाविषयेव्यं
जनांगीक्रियत इति महत्संग्रहः । नचैकार्थतात्पर्यग्राहकप्रकरणादेरन्यार्थगो
चरशक्तिप्रतिबंधकत्वं तदेवापरार्थशक्तिनियंत्रणमित्युच्यते प्राचीनैः कथ
मन्यथासशंखचक्रोहरिरित्यादिषु द्व्याद्यर्थानुपस्थितिरिति वाच्यं । प्रमाणाभा
वात् । अपरार्थप्रत्ययेकस्यापि विवादाभावात्तत्रापि तात्पर्यग्राहकाभावता
वास शंखचक्रोहरिरित्यत्रैव द्व्याद्यर्थानवबोधस्तत्र तात्पर्यग्राहकानवतारा
न्नतु नियंत्रणादिति चेन्न । यत्रैकार्थतात्पर्यग्राहकं प्रमाणमवतरति नापरा
र्थे तत्र व्यंजनां विनागत्यंतराभावात् । अथ फलबलात्कल्प्यते ऽवश्यमपरार्थे
पि तात्पर्यग्रहः स्यादेव । अन्यथा व्यंजनात्मकवृत्यंतरकल्पनापत्तिरिति चेन्न ।
अपरार्थे ऽवश्यं तात्पर्यग्रहो भवतीत्यस्य शपथेनैव प्रत्याययितुं शक्यत्वात् ।
नचक्लृप्तमेववृत्यंतरकल्पनागौरवापत्तिरेव तत्र बीजमिति चेन्न । अनैर्बोधात्

व

बाधित

तथाहि। नहि मयाषट्पदार्थी भिन्ना व्यंजना नाम काचिद्वृत्तिरंगीक्रियते येन
धर्म्यंतरकल्पनागौरवं स्यात्। किंतु येन संबंधेन पावनत्वादिकमुपस्थाप्यते त
स्य व्यंजनेति नाम स्थाप्यते। बोधकत्वेनाभिधातस्तस्या वैलक्षण्यात्। न चाभि
धाया एव तत्र बाधितबोधकत्वं कल्प्यतामिति वाच्यं। तस्याः क्वाप्येवमकल्पना
त्। वस्तुतस्तु। अनेनेदं नोक्तमपि तु व्यंजितमिति प्रतीत्यो वैलक्षण्यादभिधातो
व्यंजनापृथक्। यथा अनुमितेर्भिन्नसाक्षात्कारो मीत्यनुभवबलात्प्रत्यक्षाद
नुमानं पृथगिति। नवीनास्तु। तद्विजनकत्वमेव व्यंजना। सैव सर्वत्र वृत्तिर्ना
भिधानलक्षणा। शक्तिः शरीरघटकत्वेन नैयायिकैरर्पितस्यावश्याभ्युपगमा
त्। न च तर्हि कथमभिधादिव्यवहारः शास्त्र इति वाच्यं। सा व्यंजना यदानुशासके
नानुशिष्यते तदाभिधेति व्यवहारः। यदा मुख्यार्थबाधानंतरमन्यार्थप्रतीति
स्तदा लक्षणेति व्यवहार इत्याहुः प्रमाणं तु। अथ तद्विजनकत्वमिस्यत्रजनकत्वे
स्वरूपयोग्यता फलोपधानं वा। नाद्यः। तस्य पूर्वं ज्ञातुमशक्यत्वात्। नापरः।

॥५॥

वाक्षेपेणवाव्यंजनयैवेतिध्येयं। ईश्वरेच्छाविशेषइति। अस्माच्छब्दादयमर्थो बोद्ध
व्यइत्याकारिकानन्वस्याः शक्तित्वे त्ताद्दृश्या लक्षणा[illegible] लेपि सत्वेन लक्षणो
च्छेदः स्यादितिचेन्न। गंगापदात्तीवाहरूपोर्थो बोद्धव्यइति विशेषरूपायाईश्वरे
च्छाया एव शक्तित्वोभ्युपगमात्। तत्रैवानुशासनादिप्रमाणत्वात्। तथा च गंगापदश
तीररूपोर्थो बोद्धव्यइतीश्वरेच्छायाः प्रमाणाभावेन शक्तित्वानभ्युपगमात्।
तोद्द कथं लक्षणोच्छेद इति। मीमांसकमते त्वाह। पदार्थान्तरमिति। लाक्षणिकस्य रू
पमाह। मुख्यार्थान्वयबाधे स्यादन्यार्थप्रतिपत्तिकृत्। लक्षणा शक्यसंबंधो
रूढितोथप्रयोजनात्। अत्र तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकप्रकारे
रु णमुख्यार्थप्रतियोगिताविरहइतिविवक्षणीयं। अन्यथा काकेभ्योदधिर
क्ष्यतामित्यत्रागहस्यार्थायामव्याप्तिः। विभजते। रूढितइत्यादि। रूढितः प्र
सिद्धेः प्रयोगप्रवाहादितियावत्। अत्र कर्मणि कुशलइत्यादौ दर्भग्रहणात्

दध्युपघातकत्वेन तत्र काकस्याप्यन्वयाबाधात्। विवक्षितेतु काकत्वेन अन्वयबाधान्नाव्याप्तिः॥२

पमुख्यार्थबाधात् गंगायां घोष इत्यादौ च मुख्यार्थे घोषाद्यधिकरणत्वासंभवात्
प्रसिद्धः शैत्यपावनत्वादिप्रत्ययात् प्रयोजनाच्च तटादिप्रतीतिः शक्यसंबंधग्र
हपूर्विकेति शक्यसंबंधो लक्षणोच्यते। प्रयोजनवती विभजते। परस्यार्थेन परा
क्षेपः स्वार्थं हित्वान्यकल्पनं। उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा। एते एवा
जहत्स्वार्थाजहत्स्वार्थे प्रकीर्तिते। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र गंगायां घोष
इत्यत्र च। उभयरूपा चेयं शुद्धा न गौणी। उपचारेणामिश्रितत्वात्। उपचारश्च सादृ
श्येन संबंधेन प्रवृत्तिर्भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमिति वा। भेदांतरमा
ह। सारोपान्या तु यत्रोक्तावनपह्नुतभेदकौ। स्यातां तु व्यधिकरणवारोप्यारोप
णाच रो। पूर्वं यच्छुद्धैवेत्युक्तं। इह तु अन्या गौणी शुद्धा चेत्यर्थः। तुशब्दः पूर्वोक्तव्यवच्छेदे
अनपह्नुतभेदकौ प्रकाशितगोत्ववाहिकत्वादिरूपविरुद्धधर्मौ। तुल्येति। सामा
नाधिकरण्येन निर्दिश्येते। सा सारोपा लक्षणा। भेदांतरमाह। विषय्यंतःकृतेन्य

॥३॥

वति हेतुत्वानादीनां ज्ञानत्वेनैव व्यंजकत्वांगीकारसंभवात् । व्यंजकानां यथा कथंचित्सं
भावनामात्रादेव व्यंजकत्वात् । व्यंजनात्तु शब्दस्थले शाब्दवृत्तिरित्यपि न निराकुर्मः । एतन्म
वैहृदि कृत्वाह । सांजनो व्यंजको मतः । शब्द इति संबध्यते । अर्थोपि व्यंजकस्तत्र सहकारित
यामतः । शाब्दानामाशुविनाशिनामर्थप्रत्ययरूपं व्यापारं विना व्यंजकत्वानुपपत्तेः । अथा
र्थव्यंजनोपायमाह । वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः । प्रस्तावदेशकालादे
वैशिष्ट्यात्प्रतिभाजुषां । योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा । बोद्धव्यः प्रतिपाद्यः प्रतिपा
दयितव्य इति यावत् । काकुर्ध्वनेर्विकारविशेषः । वाक्यवाच्यसहितोऽन्यसंनिधिरित्यर्थः । आ
दिग्रहणाच्चेष्टापत्तेः परिग्रहः । अर्थस्य वाच्यलक्ष्यव्यंग्यात्मनः । अथोदाहरणानि । अइपिहुलं
जलकुंभं घेत्तूण समागदम्हि सहि तुरिअं । समसेअसलिलणीसासणीसहा वीसमामि खणं ।
अकस्मादस्याः कथमेतादृशाश्रमइति तर्कयंतीं सखीं प्रतीयमुक्तिः । अत्र चौर्यरतगोपनं व्य
ज्यते । अत्र वक्त्र्याः पुंश्चलीत्वं वैशिष्ट्यं । कुलवधूत्वे वैवमप्रतीतेः । पृथुलरूपवाच्यसखी
रूपबोद्धव्ययोरपीदमुदाहरणं तंत्रेण बोध्यं । काकोर्यथा । तथाभूतां दृष्ट्वा नृपसदसि पां
चालतनयां वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः । विराटस्यावासे स्थितमनुचिता

रं न निरतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु। कुपितस्य भीमस्योक्तिरियं। अत्रेत्थ-
मित्यध्याहार्यं। अन्यथा प्रकारांतरेण खिन्ने प्रकारांतरेण खिन्ने प्रकारांतरेण खेदभजना-
नौचित्यानुपपत्तेः। अत्र मयि न योग्यः खेदं कुरुषु योग्य इति काकुः प्रकाश्यते। न चैवं काका-
क्षिप्तत्वेन गुणीभूतव्यंग्यमेतत्स्यात् ननु प्रधानीभूतध्वन्युदाहरणमिति वाच्यं। सहदेवा-
द्यामियदेवं गुरुः करोतीति तत्कथमित्येवंरूपेण प्रश्नमात्रेणैव काकोर्विश्रांतेः। अन्य-
थाताद्दृशप्रश्नं विना खिन्ने खेदभजनस्य वाक्यार्थस्यानुपपद्यमानस्य काकुवैशिष्ट्ये-
न कुतो व्यंजकत्वं। किंतु काकोरेव व्यंजकत्वं स्यात्। अत्र प्रश्नांशे गुणीभूतव्यंग्यत्वेपि म-
यि न योग्यः खेद इत्याद्यंशे ध्वनित्वमेव। तथा चायोग्यकारित्वस्य वर्णनीयक्रोधप्रकर्ष-
हेतुत्वेन प्राधान्याद्ध्वन्युदाहरणमेतदिति हृत्। वाक्यवैशिष्ट्यस्य यथा। लावण्यं तदसौ कांति-
स्तद्रूपं स वचःक्रमः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्। अत्र तदेत्यधुनेति विच्छि-
न्नवाक्यविशेषवैशिष्ट्येन प्रमोदातिशयवैपरीत्यातिशयौ व्यज्येते। वाच्यवैशिष्ट्यं तु
अइपिकुलमित्यनेनोदाहृतं। अन्यसंनिधिवैशिष्ट्यस्य यथा। संकेतकालमनसं विटं ज्ञा-
त्वा विदग्धया। ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं। चेष्टाविशेषस्यापीदमुदाह-

११३॥

११२॥

क

रणं। अत्र जिज्ञासितः संकेतकालः याचिन्निशासमर्यं शं[illegible]सिना कमलनिमीलनेन
प्रकाशितः। प्रस्तावः प्रकरणं यथा। गतोऽस्तमर्क इत्यनेन तत्तत्प्रकरणवैशिष्ट्यात्तत्प
लं प्रस्यवस्कंदनावसर इत्याद्यर्थो व्यज्यते। देशो दूरादिः कालो वर्षादिः। यथा। उवरि
घणं घणपडलं दूरे दयिआ किमेद मावडिअं। हिमवंदिदि[illegible]सहिउं कोवा विट्ठोफणी
सीसा। अत्र कालदेशवैशिष्ट्येनानर्थातिशयो व्यज्यते। एवं लक्ष्यस्य व्यंजकत्वं यथा।
उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता न वता परं। विदधदीदृशमेव सदा सखे सुखि
तमास्स्व ततः शरदां शतं। एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्तिोँपकाराति अ
शयो व्यंग्यः। व्यंग्यस्य यथा। उअणिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ। णिम्म
लमरगअभाअणपरिट्ठिआ संखसुत्ति व्व। अत्र निष्पंदत्वेनाश्वस्तत्वं तेन च जननरहित
त्वं अतः संकेतस्थानमेतदिति कयाचित्कंचित्प्रत्युच्यते। शाब्दप्रमाणवेद्योऽर्थो व्यन
क्यर्थांतरं यतः। अर्थस्य व्यंजकत्वे तु शब्दस्य सहकारिता। शाब्देति। न हि प्रमाणांतरवे
द्योऽर्थो व्यंजक इति सिद्धं शब्दार्थव्यंजकत्वं॥ ॥छ॥ ॥ः॥ ॥इति [illegible]पकाव्यप्रदीपिकायां
शब्दार्थनिर्णयो नाम प्रथमोल्लासः॥ ॥ः॥ ॥छ॥ ॥अथ काव्यस्य सविभागं विशेषलक्षण

निरंजने। तथा स्नेन सर्वं स्तनस्व ७ निषेधो न गतासीत्यत्र २

व्यं

माः। वाच्यातिशयिनि व्यंग्ये चमत्कारविधानतः। उत्तमं तद्बुधैः काव्यं ध्वनिरित्यभिधीयते।
यथा। निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं
तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमा वापीं स्नातुमितो गतासि न पुनस्त
स्याधमस्यांतिकं। अत्र तदंतिकमेव रंतुं गतासीति प्राधान्येनाधमपदेन व्यज्यते। अत्र
केचित् अत्र स्तनतटं निःशेषच्युतचंदनं स्तनसंध्यादि। तत्र तथाविधनायककरपरा
मर्षयोगात्। एवमधरः परोष्ठ त्वत्र रागो निःशेषो न परोष्ठे। तत्र चुंबननिषेधात्। एवं नेत्रम
ध्येवं चुंबननिषेधाद्दूरत एवं संभवति। न स्नाने। स्नाने चेत् सर्वावयवे देहे व चंदनच्यवनादी
नां तेक साध्यानां स्नानकार्यत्वबाधेन स्नातुं गतासीत्यत्रैव विधिश्च लक्ष्यते रंतुमिति
व्यज्यते। न च तथा सति मम धर्मिणि अ इत्यत्रापि भ्रमणनिवृत्तिः स्यादिति वाच्यं। तत्र भ्रम
रणे दोमुख्यार्थबाधानवतारात्। तत्र तदादिपदप्रतिसंधाने न स्नाने बाधावतारा
दुक्षणवश्यकी स्याकुः। तन्न। मतस्तथाविधचंदनच्यवनादीनामपि स्नानकार्यत्व
संभवस्येव। तथाहि। वापीं स्नातुं गतासि न तु गृहे। इदं वापीपदप्रयोगाद्दृश्यते। अन्य
था तत्पदोपादानं व्यर्थं स्यादिति। तत भ्रव स्तनतटं एव वा निःशेषचंदनच्युतिर्न तु संध्या

॥ २ ॥ स्ति ५ ॥ २ ॥

8

वनादि स्यादिति। तथाविधचंदनच्यव ७

तु ५ ति ५

दिषु। वापीतीरस्य जनाकीर्णतया तथाविधमार्जनासंभवात्। गह्वर एव तत्संभवात्तु
तथा पूर्वोक्तस्य न्युक्ततया बहलजलसंबंधाभावान्न तु निःशेषरागच्युतिः किं त्वधरस्य
बहुतानत्वेन बहलजलसंबंधात्। न तथा स्नानकाले मुद्रणं नेत्रमध्ये नांजनाराहित्यं।
किंतु दूरत एव स्यादिति रूपेण स्नानकार्यत्वसंभवाद्बाधानवतारात् कथं गतौ लक्षणा।
किंतु वक्तृबोद्धव्यवैशिष्ट्याद्व्यंजनैव। तदाह। तदंतिकमेव रंतुं गतासीत्यं व्यज्यत इति। तदंति
कमेवान्यत्रैवंविधाकार्यस्यासंभावितत्वात्। न च तथापि तदंतिकमेव रंतुं गतासीति
तात्पर्यानुपपत्त्या लक्षणा स्यादिति वाच्यं। विदग्धनायिकायाः स्नानप्रकाशकत्वेनै
व तत्र तात्पर्यात्। मिथ्यास्नानं गतासीत्यत्र नञ् काकुः न गतासि। अपि तु गतास्येवे
त्यर्थः। का काकुरिति स्यन्नाक्षिप्तत्वेन न तथात्वं तादृशे स्यादेव ध्वनित्वं। अत्र त्वव्यक्तृते
ज्ञायां यद्बाध्यबाधकबुद्ध्या विश्वासिमियच्च तत्र दुर्विदग्धे हठ मन्तुं क्षिप्तं तद्युक्तमेव मय्ये
वं विधं वंचनपात्रत्वमिति तीर्ष्याहेतुकविप्रलंभजनेद संचारिनिर्वेदध्वनिः। तदनु
गुणभवद्दूतीसंभोगाः। वंदनच्यवनादीनां च वाच्यानां परिरंभचुंबनाद्यनुभावानां
संभोगोत्कर्षद्वारा दूत्या याउत्तेजकानां निर्वेदोत्कर्षकत्वमेव व्यंग्यं। अतादृशगुणि

स्त्रा ५

२२

भूतव्यंग्यं व्यंग्ये तु मध्यमं ॥ अतादृशि वाच्याद् अतिशायिनि । चित्रान्यत्वे सतीति वि
शेषणीयं तेन चित्रे नातिव्याप्तिः ॥ यथा । ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसना
थकरं । पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया । अत्र वञ्जुलके वने दत्तसंके
ता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् । अस्यान्तरालिक
व्यंग्यापेक्षयैव गुणीभूतव्यंग्यत्वं । रसापेक्षया तु रसध्वनित्वं । एवं च सालंकारध्वने
रपि वाच्यतः प्राधान्यमात्रेण ध्वनित्वं । रसापेक्षया तु गुणीभूतव्यंग्यत्वमिति । अत ए
व सर्वेषां काव्यानां ध्वनित्वमेवेति महिमभट्टः ॥ शब्दचित्रं वाच्यचित्रमव्यंग्यं त्वव
रं स्मृतं । अस्य लक्षणमाह । अव्यंग्यमिति । तत्त्वं च स्फुटप्रतीयमानव्यंग्यरहितत्वं ।
अन्याहितत्वे चित्रस्य तिरोधानेन झटिति प्रतीयमानस्याभावात्वमिति यावत् । तदेव चित्र
त्वं । तस्य विभागमाह । शब्दचित्रं वाच्यचित्रमिति । अवरं अधमं । तत्र शब्दचित्रं यथा ।
उरगं तु रगं खगं न गं न गं वा करिणं केसरिणं खरं नगं वा । स हेदाद्भुतमेव देवनघाल
हरीकेन हरीचरीकरीति । अर्थचित्रं यथा । वैवस्वतो मनुर्नाम माननीयो मनीषिणां ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव । अत्र पूर्वत्र गीर्गतविषयकभाव स्य

॥२१॥

रत्नराजविषयकेनाभवस्य सत्त्वेप्यनुप्रासोपमाभ्यामाहितचमत्कारव्यव
हितत्वाच्चित्रत्वं। अत्र केचित्। गुणप्रधानभावात्स्याद्व्यंग्यस्यैव व्यवस्थितेः। उ
भे काव्ये तदन्यं यत्तच्चित्रमभिधीयते इत्यादिशास्त्रभेदे एककाव्येन तु चित्रमित्याहुः।
अथ ध्वनिभेदाः। तत्रादौ लक्षणामूलध्वनिमाह। अविवक्षितवाच्यो यस्तत्र वा
च्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं। लक्षणामूलगूढव्यंग्यप्रा
धान्ये सत्यविवक्षितं वाच्यं यत्र सः। ध्वनावित्यनुवादाद्ध्वनिरिति ज्ञेयः। अत्राविव
क्षितत्वं वाच्यताछेदकप्रकारेणेति बोध्यं। अन्यथा काकेभ्यो दधि रक्ष्यतामित्यत्र वा
च्यस्यापि विवक्षणात्तदसंग्रहः स्यात्। अर्थान्तर इति। स्वार्थमपरित्यज्यार्थान्तरपरश
ब्दकमित्यर्थः। अत्यन्तमिति। शक्यस्य सर्वथानन्वयित्वादन्वयप्रतियोगित्वं तिर
स्कार इत्यर्थः। केचित्तु। कदलीकदलीत्यादौ द्वितीयकदल्यादिपदे गडुकत्वादिल
क्षणायां अर्थान्तरे स्वविशेषरूपे संक्रमितमित्याहुः। तदत्र वाच्यात्यन्ततिरस्कृ
तवाच्यौ द्वौ भेदौ ज्ञेयौ। तत्राद्यो यथा। त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति।
आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्। अत्र वाच्यस्यानुपयुज्यमानत्वा

लक्षणामूलस्यार्थान्तरसंक्रमितः।

समवायः परस्परं सापेक्षत्वेति लक्ष्यं॥

लक्षणे वाक्यमयणीया। तथाहि। त्वामुपदेश्यं। अहमुपदेष्टा। वच्मि उपदिशामीत्य
र्थो लक्ष्यतः। तथा। रवश्यवाच्यहिताहितत्वालंघनीयात्वादरग्राह्यत्वानिव्य
ज्यते। एवं विदुषामनन्यसाधारणज्ञानवतामितिलक्ष्यं। आमुविपक्षहूषक
त्वं सर्वग्राह्यैकपक्षत्वं च फलं। आत्मीयांपराजतायामितिलक्ष्यं। अदुष्टपक्षो
ज्जीवनं फलं। स्थितिसावधानामितिलक्ष्यं। विपक्षछिद्रप्रेक्षित्वं फलमिति
द्वितीयो यथा। उपहृतं बकुतत्राकिमित्यादि। एतदपकारिणं प्रतिविपरीत
लक्षणया कश्चिद्वक्ति। अत्रापकारातिशयो व्यंग्यः। कार्यमिति कथं व्यंग्यं लुप
र्वत्र वास्य। यं परत्रास्य। या। अभिधामूलध्वनिमाह। विवक्षितं चान्यपरं वा
च्यं यत्रापरस्तस्तः। वाच्यविवक्षायां न ध्वनि ध्वनितमित्यत आह। अन्यपर
मिति। अन्यपरं व्यंग्यनिष्ठं। तदाक्षेपकत्वेन तत्र विश्रांतमिति यावत्। एष च।
कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः। अलक्ष्येति। विभावादिभिः प्रसा
व्यते रसद्दति व्यंजकव्यंग्यप्रतीत्योः स्तिक्रमः सन्नपि तत्र व्यतिहननवन्न लक्ष्यते।
आस्वादेन हृदिति चित्तचर्वणोत्तरकालं सोऽस्त्यास्ये। तत्र च। रसत्वावतदा

त्र प

ल

॥२०॥

॥२०॥

न्नाभेन भावशान्त्यादिरक्रमः। भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः। आदिग्रहणा
द्भावोदयभावसंधिभावशबलत्वानि परिगृह्यन्ते। क्रम इति। असंलक्ष्यक्रम इत्यर्थः।
प्रधानतया यत्र स्थितो रसादिस्तत्रालंकार्यः। अन्यत्र प्रधाने वाक्यार्थे यत्राङ्ग
भूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेयऊर्जस्वि समाहितादयोऽलंकाराः। स्थितः
स्थिरतामापन्नः। तेनाङ्गतां बाध्यतां वा प्राप्तेः रसादेर्न तथात्वमिति। रस इवेतीवार्थे
वतिः। अङ्गभूतस्य रसस्य परिपुष्ट्यभावाद्रसतुल्यत्वात्। प्रेय इति। भावस्याङ्गत्वेन
तत्प्रेयतरं काव्यं रसाभासस्याङ्गत्वेनोर्जस्वि। भावप्रशमस्याङ्गत्वे समाहितमिति मं
तव्यं। तत्र रसस्वरूपमाह। कारणान्यथ कार्याणि सहचारीणि यानि च रत्यादेः
स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः। विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारि
णः। व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः। कारणानि रामशीतादीनि
परस्परानुरागानुरागे परस्परं कारणानि तस्योद्दीपने च कारणानि उद्यानादीनि। अ
नुभावार्थे कटाक्षादीनि कार्याणि। लज्जाहास्यादीनि सहचारीणि रत्यादेरुप
चायकानि सामग्रीसंपातेन रत्यादिभिः सहचरणात्सहचारीण्युच्यन्ते। सहका

रीणीति पाठे रत्यादेरेकरूपस्य तत्तद्द्विविचित्रस्मितरुदितादिकार्यजननायोगेन सा
मग्रीवैचित्र्यापादकानि। विभावावृत्ति। ते तु द्विधा। आलंबनविभावा नायिकादय उद्दी
पनविभावा उद्यानादयः। ननु कारणादिशब्दसत्वे कथं विभावादिसंज्ञेति चेदुच्यते। सा
माजिकनिष्ठरत्यादीनामास्वाद्यत्वेन ज्ञाताः सीतादयो न कारणादपोद्यन्ते तथा स्युः
तेषां च विभावनानुभावनासंचारणरूपव्यापारत्रयवत्वात्तथाविधसंज्ञाः। तेषां
च व्यापाराणां यथाक्रमं रत्यादेरीषत्प्रकाशः स्फुटतरः प्रकाशः स्फुटतमः प्रका
शः फलं विगलितवेद्यांतरत्वेन स्थितिः पुरःस्फुरणादि चमत्कारित्वं च। भाव इति। भाव
यति वासतीति भावो वासना तेन निर्वासने भुक्तोत्रियादिषु न रसप्रसंगः। अथांतःक
रणवृत्तिविशेषस्य रत्यादेरभिव्यक्तावेव कथमनिर्वचनीयानंदरूपरसोद्बोध
इति चेदुच्यते। अयमभिसंधिः। काव्ये हि विभावादिभिरभिव्यज्यते स्थायी तस्यां चाभिव्य
क्तावंतःकरणवृत्तिरूपायां चैतन्यानंदरूप आत्मापि भासते। वेदांतिनये सर्वस्मि
न्नेव ज्ञाने आत्मभानं न यस्मात्। आत्ममनोयोगघटिताया आत्मभानसामग्र्याः सत्वा
त्। अज्ञातस्यात्मनो भानं विना प्रत्यक्षादीनामज्ञातज्ञापकरूपप्रामाण्यानुपप

पी ४

॥१२॥

॥१२॥

तेभ्यः एवं च सति काव्यदर्शनश्रवणमहिम्ना उत्कैयाभिव्यक्तया चैतन्यस्यानंदांशे
आवरणभंगः क्रियते। तथा च रस्याघवछिन्नं चैतन्यमानंदांशे भग्नावरणतयानंद
रूपतया प्रकाशमानं रस इति पर्यवसितोर्थः। इममर्थं श्रुतिरप्याह। तैत्तिरीयशाखा
यां। रसो वै सः। रसं ह्येवायं लब्ध्वानंदी भवति। अयं जीवः। आवरणत्वे ज्ञानमेव
ज्ञानांतरेत्वानंदांशे आवरणभंगाभावान्न रसोद्बोधः। अग्रे च वक्ष्यामः। अत एव
वक्ष्यामः। वर्ण्यमानतैकप्राणा इति। चर्वणाया नंदांशाभिव्यक्तिः कथं सैव ज्ञानानां
तं भवतीति चेत्। न। विभावादिज्ञानाभावात्। अत एव वक्ष्यामो विभावादिजीविता
वधिरिति। तस्याश्चाभिव्यक्तौ लिंगिकोपहितलौकिकभावजनकत्वविभावादिसं
भेदोप्यावश्यकः। अत एवोक्तं भरतेन। स्वादृष्ठ काव्यार्थसंभेदो ब्रह्मानंदसमुद्भव
इति। काव्यार्थो विभावादिस्तेषां संभेदो ज्ञानं। तेन विभावादिसमूहालंबनात्मा रस
इत्यर्थः। स्वयं च वक्ष्यामः। पानकरसन्यायेनेति। अत्रेदमवधातव्यं। वासनाविशे
षवतां सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको भावः। पौनः पुन्ये
न रत्यादिभिः समं गृहीतकार्यकारणभावादिसंबंधैर्विभावादिभिः परिहृतविशेषै

ती

रेन

बा

र्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संब-
न्धिविशेषस्वीकारपरिहारनियमानवसायात् साधारण्येन प्रतीतैर्निर्यैमात्तग तत्र
तत्वेनास्थितोपि साधारण्योपायबलात्कालाधारण्यमुपागच्छन्नुचिदात्मना सहाभिव्य-
क्तस्तत्कालोद्बुद्धसंस्कारैश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन
चर्व्यमाणः पुर इव स्फुरन्हृदयमिव प्रविशन्सर्वाङ्गीणमिवालिंगन्नन्यत्सर्व-
मिव तिरोदधद्ब्रह्मानंदास्वादमिव प्रादुर्भवन्नलौकिकचमत्कारकारी शृंगारादि-
को रसः। ननु प्राक्सिद्धो कथं तस्य प्रतीतिरित्यत आह। वासनात्मतयेति। भावो व-
र्णनीयतन्मयीभवनयोग्यः। पौनःपुन्येनेति। अत एव धूमादितो वह्न्यादिज्ञा-
नवत् विभावादितो रसाद्यभिव्यक्तिः। ननु कथं रामादिसंबन्धित्वेनावगतेभ्यः सी-
तादिभिः सामाजिकरत्युद्बोधो संबन्धादित्यत आह। साधारण्येनेति। काव्यनाट्यप्र-
वणदर्शनमहिम्ना रत्यादिभावानां सामाजिकस्य वर्णनीयेन सह तन्मयीभावसं-
पादकत्वाच्च रामादिना नेदाग्रहे सति साधारण्येन प्रतीतिर्ज्ञायते। सा च संबन्धिवि-
शेषनिष्ठत्वेनाप्रतीतेः प्रतीतिः। ननु सीतात्वादिनाज्ञाने कथं सैव साधारण्येन प्र-

॥१२॥ ॥१२॥

विशेष

नीतिमित्यत आह। परिहृतविशेषैरिति। विशेषाः सीतात्वादयः। अत एवोक्तं। परिहृ
तविशेषा रसा हेतव इति। अयं च परीहारो स वाक्यार्थबोधकाले ततो रसोद्बोध इति।
रत्यादिभावस्यापि साधारण्यं रसोद्बोधे हेतुरित्याह। साधारण्यमिति। अन्यथा
सीताद्यालंबनकरत्यादेरात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातंकादिर्भवे सद
गतत्वे त्वरस्यतापातः सभ्यानां रससाक्षारानुपपत्तिश्च। साधारण्ये चोक्तमेव।
तदुक्तं। पारिमित्याल्लौकिकत्वात्सांतरायतया तथा। अनुकार्यस्य रत्यादेरुद्बोधो
न रसी भवेत्। पारिमित्यमसाधारण्यं। स च न कार्यस्तस्य चित्स्वरूपत्वात्। नापि

रि

घटादिवत् ज्ञाप्यः तस्य फलव्याप्यत्वाभावात्। चर्वनिष्पत्त्या तस्य निष्पत्तिरु
पचर्यत इति। तथा वृत्तिव्याप्यत्वादेव ज्ञाप्य इत्युच्यते। तदुक्तं। फलव्याप्यत्वमेवा
स्य शास्त्रकृद्भिर्निराकृतं। ब्रह्मण्य ज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यत इ
ति। सा च वृत्तिस्त्वमस्यादिवाक्यैर्लाक्षणिकीव काव्ये व्यंजनामूलेति समतौ
र्यं। सा चैतत्वंस्यपत्रेव काव्येशब्दार्थाभ्यां साक्षात्काररूपा जायते। तेन रससा
क्षात्कार इति व्यवहारः। यः साक्षादपरोक्षं ब्रह्मेति चैतन्यांशे साक्षात्त्वाच्च। व्याप्त

एण द्द

मसी

ता

रयोर्विभावानुभावा न कस्यैव वीराद्भुतरौद्राणां अभ्युपादयोनुभावाः शृंगारस्यैव क-
रुणभयानकयोः स्थितं तादयो व्यभिचारिणः शृंगारस्यैव वीरकरुणभयानकानां
मिति पृथगनैकांतिकत्वाद्विभावादयो मिलिता एव व्यंजकाः प्रत्येकैकस्यैव स्थि-
तिस्तदन्यतमद्वयापेक्षाद्विति पृथगनैकांतिका मिलिता स्यैव व्यंजकेत्यतः रसस्य विभा-
वादि समूहालंबनात्मकत्वेन एकैकस्मात् रसाभिव्यक्तेरसंभवात्। तद्विशेषमा-
ह। शृंगारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये र-
साः स्मृताः॥ तत्र शृंगारस्य द्वौ भेदौ संभोगो विप्रलंभश्च। उभयस्यैव रतिप्रकृ-
तित्वात्। तत्रा[illegible]घः। परस्परालोकनालिंगनचुंबनाद्यनंतभेदादपरिच्छेद्य इति
संभोगत्वसामान्यमेकमाश्रित्यैवैकरूपत्वमपि ते। संभोगत्वं तु विप्रलंभमभिन्नत्वेन
तिरतिप्रकृतित्वं। यथा। शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्रा-
व्याजमुपागतस्य बहुशो नि[illegible]र्वर्ण्य पत्युर्मुखं। विस्रब्धं परिचुंब्य जातपुल-
कामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता॥ अ-
परस्य विप्रलंभस्य विरहेर्ष्याप्रवासशापहेतुक इति पंचविधः। स च संगमप्रत्याशाका-

का

13

॥१३॥

व

॥१३॥

कृ

णरस्यप्र

लीनस्तदनुरागः। अभिलाष इच्छा। दैवेकोपि गुर्वादि पारतंत्र्ये विरहः। देशे क्ष इति विशेष
वास्वाद्वेदः कथितः स्वतंत्रेण न मुनिना तथैव विभागकरणात्। अन्यासंगिनि प्रिये को
प ईर्ष्या। प्रणयहेतुको विप्रलंभ इति केचित्। प्रवासो वैदेश्यं। मुन्यादि कोपनियंत्र
णं शापः। अत्र हेतुर्नियतपूर्ववर्ती। अभिलाषस्यानुत्पादकत्वेपि पूर्ववर्तित्वं निय
तमेव। किंत्विच्छाविरहात्। यूनोरेकतरस्मिन्गतवति लोकांतरं पुनर्लभ्ये। विमनायते
यदेकस्तदा भवेत्करुणविप्रलंभः। इति। मूर्छितनायिकादिविषयकः करुणवि
प्रलंभो न्योस्तीति प्रांचः। क्रमेण यथा। न्यंचद्भ्रूं मीनस्याः किं लज्जालोलविलोच
नं। अंतःस्मितस्फुधासिक्तं भूयादर्धवचो मयि। अन्यत्र व्रजतीति का खलु कथा नाप्यस्य
ताहक्सुहृद्यो मां नेच्छति नागतश्च हहहा कोयं विधेः प्रक्रमः। इत्यल्पेतरकल्पनाक
वलितस्वांता निशांतांतरे बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि। निःश्वा
स्युतचंदनमिस्तादिःपामीति प्रियप्रियायाः प्रियायाः कंठसंस्थयोः वचो जीवितयोरा
सीत्पुरो निःसरणे रणः। त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चर
णपतितं यावदिच्छामि कर्तुं। अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्न

ष्पिनसहृते संगमं नीहृतानतः। अत्राद्यपादत्रयमेव विप्रलंभोदाहरणं। क्रूरे स्यादि वाक्यां
तरं भावाभिव्यंजकं। अतः शब्देन विधिनेत्यस्य नानेन तुल्यता। तत्र समाप्तिपर्यंतं
यावत्तावत्सदाभ्यामेकवाक्यत्वेनैवान्वयात्। अथ हास्यादीनां क्रमेण यथा। दंडक
मंडलुमंडितहस्तः सुललितितिलकविभूषितमस्तः। अयमुपसर्पति जंगमभावक
काषायपटार्पितशोभः। गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलावि
धौ। करुणाविमुखेन मृत्युना हरता त्वां बत किं न मे हृतं। हृतमनुमतं दृष्टं वा यदि
दं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां स
भीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं। वीररसो दानधर्मदयायु
द्धभेदाच्चतुर्विधः। क्रमेण यथा। क्षिप्तस्य मेरुर्न यदर्थिसात्कृतो न सिंधुरुत्सर्गजलव्ययै
र्मरुः। असमानितत्तेन निजाय शोधुगां द्विफालबद्धाश्चिरगुराः स्थिराः स्थिताः। राज्यं वसु वदेह
मवनार्यानाथ तस्युतात्मव। पत्नी। लोके समायत्तं तद्धर्मायुसरोऽपतत्। शिरामुखैः स्यंदत ए
वरक्तमस्याथापि देहे मम मांसमस्ति। तृप्तिं न पश्यामि तवापि तावत् किं भक्षणं त्वं विरतो
गरुत्मन्। युद्धः संत्रासमेते विगलितहरक्षोभिन्नशक्रेण कुंभाधुष्महद्देहशुलनासां दधाति

लो॰ नं ४

॥१५॥

॥१५॥

वि॰

परमसीमायकाभिः पतंतः। सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचि
द्भ्रूभंगलीलानियमितजलधिं राममन्वेषयामि। ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने दत्त
दृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं। दर्भैरर्द्धावलीढैः श्रमविवृ
तमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति।
उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृष्ठपिंड्याद्य
वयवसुलभान्युग्रपूतीनि जग्ध्वा। आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करं
कादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति। चित्रं महानेष बतावता
रः क्वकांतिरेषाभिनवैव भंगिः। लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष
सर्गः। एवं स्थायिभावानाह। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा वि
स्मयश्चेति स्थायिभावाः प्रकीर्तिताः। स्पष्टं। तथानाद्यादन्यत्र। निर्वेदः स्थायिभावो
स्ति शांतोऽपि नवमो रसः। निर्वेदस्वरूपमाह। तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमा
ननं। अत्रेदमवधातव्यं। स्थायी स्याद्विषयेष्वेव तत्त्वज्ञानाद्भवेद्यदि। इष्टानिष्टवियोगा
प्तिकृतस्तु व्यभिचार्यसौ। इति। असौ निर्वेदध्वनिः। यथा। धन्यानां गिरिकंदरोदर

स

सुप्ति विबोधो मर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ५

शुक्ति ज्योतिः परं ध्यायतामानंदाश्रुजलं पिबंति शकुनो निःशंकमंके शयाः। अस्माकं तु
मनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिमंडपजुषामायुः क्षयं नीयते। व्यभि
चारिणो ब्रूते। निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः। आलस्यं चैव दैन्यं च चिंता
मोहः स्मृतिर्धृतिः। व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो विषाद औत्सुक्यं निद्रापस्मा
र एव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः समाख्या
तास्तु नामतः। बलस्यापचयो ग्लानिः शंकानिष्ठसमुन्नयः। समुन्नयः संभावना। परोत्कर्ष
क्षमासूयाशंकोपहसितादिकृत्। अनर्थातिशयाच्चेतस्यावेगः संभ्रमो मतः। कोप एव स्थि
रतरोऽमर्ष इति कथ्यते। अवहित्थाकारगुप्तिरर्थनिर्धारणं मतिः। औत्पातिकैर्मनःक्षो
भस्त्रासः कंपादिकारकः। पूर्वापरविचारोत्थं भयं नासास्तथ भवेत्। इति दिशा त्रास
स्य व्यभिचारित्वं भयस्य स्थायित्वमिति बोध्यं। अपस्मारस्य व्याधित्वेन प्राप्तावपि पुनरुपा
दानं बीभत्सभयानकयोरेव संभवनियमायाय। रतिर्देवादिविषया व्यभिचारी तथांजि
तः भावः प्रोक्तः। आदिग्रहणान्मुनिगुरुनृपपुत्रादिविषया। कांताविषया तु शृंगारः। यथा
कंठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतं। अप्युपात्तममृतं भवद्वपुर्भेद

११५॥

ति४ वाकार

हृत्तिर्यदि मेन रोचते। ननु कथमस्य न रसत्वमिति चेन्न। नव रसाः अन्ये भावा इति स्वतं
त्रेण मुनिना तथैव विभागकरणात्। अत एव वात्सल्यनाम्नो दशमोऽरसोऽस्तीति कस्य
चिन्मतं निरस्तं। भावेनैव गतार्थत्वात्। व्यभिचारी यथा। जाने कोपपराङ्मुखी प्रियतमा
स्वप्नेऽद्य दृष्टा मया मा मा मा संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता ततः। नो यावत्परिरभ्य चाटु
कशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः। अत्र सेनुमी
यमानेऽपि विधिं प्रत्यसूयैव काव्यसर्वस्वत्वेनानुभूयते इत्यादौ भावध्वनिरिति अवधे
ते। प्राधान्येन व्यपदेशा भवंतीति न्यायात्। इयं भावस्थितिरुक्ता। तदाभासा अनौचित्य
प्रवर्त्तिताः। तदाभासाः रसाभासा भावाभासाश्च। तत्र रसाभासो यथा। स्तनभरः कं बाला
क्षिप्य क्षणमपि विना यं न रमसे विलेनैं प्राणा न रमणं सुखमस्वे यं मृगनयसे। मुल पै कोणी
तः शशिमुखि विषमालिंगसि बलात्तपःश्रीः कस्येवामदननगं ध्यायसि तु यं। अत्र यं भि
स्य सद्भूसद्भक्तेर्मोपादानं अनेककामुकविषयमभिलाषं तस्याव्यनक्ति। यच्चैकवि
षयत्वमभिप्रेतं स्यात्तदा सहृदेवकर्मोपादानं कुर्यात्। रमणालिंगनान्वेषणादि व्यापा
रा बहुवक्तव्यसर्व एव वर्त्तमानकालीनानेकविषयत्वे संभवंती स्यनेककामुकविषयाभि

क:५ ३५ २ ५४

२१

ऽनौषप्रत्ययाव्रते रानासत्वं । भावाभासो यथा ॥ राकासुधाकरमुखी तरलायतताक्षी
सास्मेरविभ्रमतरंगितविभ्रमांगी । तत्किं करोमि विदधे कथमत्र मैत्री तत्स्वीकृतिव्य
तिकरे क इहाभ्युपायः ॥ अत्र चिंता अनौचित्यप्रवर्त्तिता । एवमन्येप्युदाहार्याः ॥ भावस्य शां
तिरुदयः संधिः शबलता तथा । क्रमेण यथा । तस्यां रघोः सूनुरुपस्थितायां वृणीत मां
नेति समाकुलोऽभूत् । आश्वासितस्तत्क्षणमंगकूटे वामेतरेण स्फुरता भुजेन । अत्रावे
गस्य । विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा । प्रासादवातायनसंनिक
र्षं ययौ शलाकामपरा वहंती । औत्सुक्यस्य ॥ अर्द्धमुपेतुं वांछत्यर्द्धमपेतुं च धावति प्राज्ञे
इति तेनार्पितदेहः पापाद्धीननारीशः ॥ अत्र धैर्यविगयोः ॥ यथा च । तं वीक्ष्य वेपथुम
तीसरसांगयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहंती । मार्गाचलव्यतिकराकुलितेव सिं
धुः शैलाधिराजतनया न ययौ न तस्थौ ॥ अत्रावेगजडतयोः ॥ क्वाकार्यं शशलक्ष्मणः
क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेपि कांतं मुखं ।
किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः ख
लु युवा धन्योधरं [illegible] धास्यति ॥ अत्र वितर्कौत्सुक्यमतिस्मृतिशंकादैन्यधृतिचिं

॥१६॥ 16

॥१६

तानां तिचर्व्यमाणता । वस्तुतस्तु । एषां पूर्वपूर्वोपमर्दनपरपरोदयः । शबलता ।
अत एव । संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहेत्यत्रेदमेवोदाहरितं । एवं स
त्यपि रसेषु काव्यसर्वस्वतां गतेरेतेरेव व्यवहारः प्राधान्येन व्यपदेशा भवंतीति न्या
याल् । रसादीनामनंतत्वाद्भेद एको हि गण्यते । अनंतत्वादिति । तथाहि । नव रसाः त
त्र शृंगारस्य द्वौ भेदौ । शृंगारो विप्रलंभश्च । तत्र संभोगस्यापि परस्परदर्शनालिं
गनपरिचुंबनकुसुमोच्चयजलविहारादयो बहवो भेदाः । विप्रलंभस्याभिलाषा
दय उक्ताः । तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं तत्रापि देशकाला
वस्थाभेदा इत्येकस्यैव रसस्यानंत्यं का गणना सर्वेषां । असंलक्ष्यक्रमत्वं तु सा
मान्यमाश्रित्य रसादिध्वनिरेक एव गण्यते । अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थि
तिः शब्दार्थोभयशक्त्युद्भवस्त्रिधा स कथितो ध्वनिः । अनुस्वानः अनुर
णनं तदाभः सदृशः संलक्ष्यः क्रमः पौर्वापर्यं अर्थाद्व्यंजकेन सह यस्य स्थिति
र्यत्र स इत्यन्वयः । यथा ध्वनिप्रतिध्वन्योः क्रमो लक्ष्यते तद्वदस्य लक्ष्यते व्यंजक
पोदित्यर्थः । स च शब्दशक्त्युद्भवोर्थशक्त्युद्भव उभयशक्त्युद्भवश्चेति त्रिविधः । शाब्दो

य

तत्र

१७

।यत्र न परिवृत्तिं सहंते स शब्दशक्त्युद्भवः तदन्योर्थशक्त्युद्भवः। यत्र केचिच्छब्दाः
परिवृत्तिसहिष्णवः केचित्त्वन्यथा उभयोरपि काव्यसर्वस्वत्वं च तत्रोभयशक्तिमू
लः। अत्र अलंकारोथ वस्त्वेव शब्दाद्यत्रावभासते। प्रधानत्वेन स ज्ञेयः शब्दशक्त्यु
द्भवो द्विधा। वस्त्वेवेत्यनलंकारं वस्तुमात्रं। तत्राद्यो यथा। भद्रात्मन इत्यादि। अत्र मि
थो संबद्धार्थद्वयबोधकत्वेन वाक्यभेदो मा भूदिति प्रकृताप्रकृतयो रूपमालंका
रो मिथः संबंधो व्यंग्य इति। वस्तुमात्रं यथा। शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि
नरेंद्र यस्मै त्वं। यत्र प्रसीदसि पुनः स भात्युदारोनुदारश्च। अत्र विरुद्धावपि त्वदनु
वर्तनार्थमेकं कार्यं कुरुत इति वस्तु ध्वन्यते। अर्थशक्त्युद्भवेप्यर्थो व्यंजकः संभ
वी स्वतः। प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोंभितस्य वा। वस्तु वालंकृतिर्वेति
चतुर्भेदो व्यनक्ति यत्। वस्त्वलंकारमथवा तेनासौ द्वादशात्मकः। अत्र स्वतः सं
भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरौचित्येनापि संभाव्यमानः प्रौ
ढोक्तिमात्रनिष्पन्नः बहिरसन्नपि निर्मितः कविना कविनिबद्धेन वक्त्रेस्य
न्नदेति। वस्तु तस्मात्। तदुर्णितस्यति भेदांतरं संभवः स्वतः कविनिबद्धस्यापि कवि

॥७॥

त

त्वात् । ते नार्थः स्वतःसंभवी प्रौढोक्तिमात्रनिष्पन्नं इति विधः प्रत्येकं व
स्तुवालंकृतिर्वेति चतुर्विधो व्यंजकः । तस्य प्रत्येकं वस्त्वालंकारो वाव्यं
ग्य इत्यष्टविधोऽर्थशक्त्युद्भवो ध्वनिः । क्रमेण यथा । अलससिरमणि धु
त्ताणं अहिमो पुत्ति धणसमिद्धिमओ । इअ भणिएण णअंगी पप्फुल्ल
विलोअणा जाआ ॥ अत्र ममैवोपभोग्यो यमिति वस्तुना वस्तु व्यज्य
ते । धन्यासि या कथयसि प्रियसंगमेऽपि विस्रब्धचाटुकशतानि रता
न्तरेषु । नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिद
पि स्मरामि ॥ अत्राहं धन्या त्वमधमा व्यतिरेकालंकारः । दर्पान्धगन्धगजकुं
भकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः । वीरैर्व्यलोकि यु
धि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे कृपाणः ॥ अत्रोपमा
लंकारेण सकलरिपुक्षयः क्षणात्करिष्यत इति वस्तु । गाढकान्तदशन
क्षतव्यथासंकटादरिवधूजनस्य यः । ओष्ठविद्रुमदलान्यमोचयन्नि

म

ईशान्युधिरुबानिशाधरः अत्र विरोधालंकारेणमप्रक्षस्यान्यस्य क्षति
र्निर्वर्तनाभिति रपबुद्धिरुत्प्रेक्षत इतिउत्प्रेक्षालंकारः एषु दुरस्ते
वृत्तः संवीवं गकः कैलासस्य प्रथमाधिरवरे वेणुसंम्ह नाभिः
श्लोकाकीर्त्तिविबुधरमणीगीयमानांपदीयास्त्रस्तापांगाः सरविसि
नीकांडसंजाततशंकादिङ्गातंगाः भ्रवणप्रलिनेहस्तमावर्त्तयंति अत्र वस्तु
नायेपामर्थाधिगमोनास्ति तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोति
त्वत्कीर्त्तिरिति वस्तु ध्वन्यते कैलासस्य वर्णामोऽदेणअसमरम्मिगअसिरीग
हिआ जह कंदराहिं विडुरा तस्स दढ कंठं अम्मि संठविआ अत्रैश ग्रहणं वलौ
कनोद्दीपितमदइव कंदरासु विधुरा न कंठे ग्रहं करोतीत्युत्प्रेक्षा गाढालिंगण
रहस्सुज्जुअम्मि दइए लहुं समोसरइ माणिणीण माणो पीडएणभीरु वहि
अ आहिः अत्रोत्प्रेक्षया प्रस्यालिंगनं तत्र विरुद्धं न तदिति वस्तु गाठेरवहस्तीं
कइवअणांकुरुहवद्धविलिवेसा दाविइम्तुवम्मसंडलमसत्तंविअज अइस्सावा
णी अत्रोत्प्रेक्षया चमत्कारैककारणं ~~कुस्त~~ नवंनवंगगदगलजासनास्था

१४

॥१२॥ ॥१२॥

के

सां ५

×पदेपि स्फुरितिप्रांचः। सोपि पदे नवतीति नवीनाः। यत्र सर्वाणि समकक्षतया पदानि व्यंजकानि स
×कलानीयप्रकारे पर्यवस्यंति। तत्र वाक्यगतत्वेन व्यवहारो यत्र त्वेकमेव प्राधान्येन व्यंजकं तत्र प
×दगतत्वेनेति वाक्यगतत्वेन व्यवहारो यत्र त्वेकमेव प्राधान्येन व्यंजकं तत्र पदगतत्वेन ध्वनि

निर्मिमीत इति व्यतिरेकः। एवं कविनिबद्धप्रौढोक्तिमात्रनिष्पन्नोप्युदाहार्यः
शब्दार्थोभयशक्त्युद्रेकः। यथा। अतंद्रचंद्राभरणा समुद्दीपितमन्मथा। तारकातर
ला श्यामा सानंदं न करोति कं। अत्र शब्दार्थानामुभाभ्यामपि समक्षतया रात्रि — कर
नायकयोरुपमानोपमेयभावो व्यज्यत इत्युभयशक्तिमूलत्वं। भेदा — व
न्वलुद्देशास्यतत्र। अस्य ध्वनेः वाक्यव्युत्थः पदेप्यन्ये। अत्रेदं बोध्यं। अविवक्षित
वाच्यप्रभृतयो यावंतो ध्वनिभेदाः कथितास्ते सर्वे वाक्ये भवंति विनोभयश
क्तिमूलं। एवं। प्रबंधेप्यर्थशक्तिमूलः। यथा। अलं स्थित्वा श्मशानेस्मिन् गृध्रगोमा
युसंकुले। कंकालबहुले घोरे सर्वप्राणिभयंकरे। न चेह जीवितः कश्चित्का
लधर्ममुपागतः। प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी। रात्रावंधस्यदि
वा प्रभवतो गृध्रस्य पुरुषविसर्जनपरं वचनं। आदित्योयं स्थितो मूढाः स्ने
हं कुरुत सांप्रतं। बहुविघ्नो मुहूर्तोयं जीवेदपि कदाचन। अमुं कनकवर्णाभं
बालमप्राप्तयौवनं। गृध्रवाक्यात्कथं बालास्त्यक्ष्यध्वमविशंकिताः। इति निशि
विजृंभमाणस्य गोमायोर्जनव्यावर्तननिष्ठं चेति प्रबंध एव व्यंजकतया प्र
×नांविवेकः। तत्र वाक्यपर्वमुदाहृताः पदेपि यत्किंचिदुदाह्रियते। यथा। वत्तवस्तेनगुणास्तनवे कस्ता
×सुमहान्गुणाः। मित्राणि नवमित्राणि ... इत्यादि। अन्यदपि स्वयमेव बोध्यं॥×१।

यते। अन्येपि भेदाः स्वयमूहनीयाः। अपि शब्दात् पदवाक्ययोः पदैकदेशरचनाव
तीष्वपि रसादयः। अपिशब्दात् प्रबंधेषु नाटकादिषु। पदं सुबंतं तिङंतं च। एकदेश
धातुनामरूपः प्रकृतिभागः। तिङ्सुब्रूपः प्रत्ययभागश्च। तत्र धातोर्व्यंजकताय
था। इकेलि हि अणिमं सणं करकिसलअरुद्धणाअणिंतु अलस्साः रुदं स्सतइं म
णअणं पम्हइ परिवुंविअं त्ति अइ। अत्र यत्नस्तुल्कर्षोभ्ययोम्भवति। सच लोकोत्त
ररूपयाभिधानवृत्त्या। लोकोत्तरतां च चमत्कारानुगुणतया। आनुगुण्यं च
रागातिशयहर्षलज्जासंपादित्वाद्रसातिशयपोषणात्। तच्च नयति नाध्याते। सा
नुशोभतइत्यादिना। इति हृते व्यंजकत्वं। नाम्नो व्यंजकता यथा। त्रयाण्येय मपा
हृतः समशपथं पाहिनतः कान्त याहि त्राण्येव पदानि वासभवनाद्यावन्नयात्यु
न्मनाः। तावत्स्त्रस्तुतपाणिसंपुटगलन्नीवीनिबंधं ध्रुतो धावित्वैव कृतप्रणाम
कमहो प्रेम्णो विचित्रा गतिः। अत्र पदानीति नलुद्वारा णीति द्वारादि व्यवच्छेदो
व्यंग्यः। सच संभोगसंचार्योत्सुक्योपोद्बलनद्वारा रसपोषणाद्धेतुः। तिङ्सुपोर्य
था। लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः सख्यः सततरुदितो

॥२६॥

19

ल्लूननयनाः परित्यक्तसर्वेहसितपठितं पंजरभुक्तैस्तावावस्थाचेयं विसृज्य कठि
नेमानमधुना । अत्रालिख्यन्निति न लिखतीति । अपि तु प्रसादपर्यंतमास्ते । तथा च
लिखनस्य न साध्यत्वं । किं त्वप्राधान्यमबुद्धिपूर्वकत्वं व्यज्यते । किं तु प्रसादपर्यंता
याः स्थितेरेव साध्यत्वमिति व्यज्यते । तथा आस्ते न त्वाश्रितइति । तेन स्थित्यतीततो
विच्छेदो व्यंग्यः । एवं मृगीमिमिति न मृगमाविति । न हि बुद्धिपूर्वकं किंचिल्लिखतीति । अधि
करणतामिधेयेनेत्याकांक्षितस्य कर्मण उद्देश्यत्वं प्रतीयते तन्न च तथेति । यथा वा
रमणीयः क्षत्रियकुमार आसीदित्यतीतकालोपदेशात् स्थितेर्वर्तमानत्वं भवि
ष्यत्वव्यवच्छेदो वगम्यते । एषा हि दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः । यथा वा
रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं दे
वो न जानाति [illegible] तं । वंदीवैष यशांसि गायति मरुद्यस्यैकबाणाहतिश्रेणीभूतविशा
लतालविवरोद्गीर्णैः स्वरैः सप्तभिः । अत्रासावित्यनेन निरंतरभावनावशोपस्था
पमानत्वं । भुवनेष्विति बहुवचनेनानयत्र क्वचिदिति । गुणैरित्यनेन दोषव्यवच्छेदो व्य
ज्यते । तथा न त्वदिति न मदिति अपि त्वस्मदित्यस्य समवाक्षेपकत्वं । भाग्यादिर्वक्ष्य
ति ।

भाग्यविपर्ययादित्युक्ते। तेनाभाग्यानावेपि न्याय्यान्येवतत्वेन परिणतानीति
प्रतीयंते। तेस्तु निर्वेदशंकादैन्यविषादातिशयोपोष्यते। यथा वा। तरुणिमनि क
लयति कला मनुमददनुषोः पठत्यग्रे। अधिवसति सकलललनामौलिमियं च
कितहरिणनयना। अत्रे मनिज्ञव्ययीभावकर्मेभ्ने ताधाराणां तरुणत्वमिति मो
गौवसतीत्यादि निस्तुत्येपि वाचकत्वेरस्तिकमिव तत्त्वरूपविशेषायशृंमत्का
रुकारी सयव व्यंजकः। तथाहि। इमनिजासो कुमार्येपरेशान वोढि त्वेवयः प्रतीयते। मुतिकुन
लुन्यत्वप्रत्ययेन प्रोक्तं। एवं पूर्वपदप्रधानोव्ययीभावेन मदनधनुषोरुणत
यानद्वयीकरणसाम्यात्यंतसृजनाग्रे प्रतीयते। तथा मौलिमिति कर्मत्वेन व्याप्ति
रूपचनामाधारत्वं लिकदेशावच्छिनतयापि निर्वहतीत्यापुनेयं। एवं नावर्णयो
गकत्वं वक्ष्यते। एषां संख्यानोक्तानुपंक्तेत्वानुपयुक्तमेतत्। एते प्रोक्ताः शुद्धभेदा
स्तेषां चान्योन्ययोजने। संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया। तेषां ध्वनीनां संश
यास्पदत्वेनानुग्राह्यानुग्राहकतयाएकव्यंजकानुप्रवेशेनवेति त्रिविधेन संकरे

४०

स्व८

॥२०॥ ॥२०॥

णा॰ परस्परनिरपेक्षरूपयाएकप्रकारयाचसंसृष्ट्याएकत्रकाव्येसंसर्ग
स्वरूपयायोजनमपि॰ यथा॰ स्वणपाकुणिआद अरंगाआएसुहअकिंपिदे
जणिआ॰ कुअइ पलोहरं वलहींघरम्मिअणुणिज्जंउवराई॰ अत्रोनुनयः किं
रूपनोगलक्षणेन अर्थान्तरेसंक्रमितः किमनुरणनन्यायेनउपभोगएवव्य
ग्यव्यंजकइतिसंदेहः॰ स्निग्धश्यामलकांतिलिप्तवियतोवेल्लद्बलाकाघ
नावाताःसीकरिणःपयोदसुहृदामानंदकेकाःकलाः॰ कामंसंतुदृढंकठो
रहृदयोरामोस्मिसर्वंसहेवैदेहीतुकथंभविष्यतिहहाहादेविधीराभवः॰ अ
त्रलिप्तेतिपयोदसुहृदामितिचव्यापनपरितोषकारित्वेलक्ष्येद्वयत्रास्तत
तिरस्कृतवाच्ययोःव्यापनातिशयपरितोषकारित्वातिशयध्वन्योःसंसृ
ष्टिः॰ आभ्यांसुहृदामोसौस्वस्यार्थान्तरदुःखसहिष्णुत्वरूपेसंक्रमितवाच्य
स्यएतादृशवैयग्र्यहेतुसंपातेपिजीवित्वरूपदुःखसहनातिशयध्वनेर
नुग्राहकभावेन॰ रामपदलक्षणेकवचनानुप्रवेशेनचार्थान्तरसंक्रमित
वाच्यस्यदुःखसहनातिशयध्वनेःरसध्वनेश्चसंकरः॰ एवमन्यदुदाहर्तव्यं॰ अथ

गूढंचमत्कृतेस्य

गुणीभूतव्यंग्यस्य प्रभेदान्नाह । अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटं । सं
दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंदरं । व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भि
दाः स्मृताः । एषां स्वरूपं लक्ष्येषु वक्ष्यामः । कामिनीकुचकलशवत् गूढं तु स्फुट
तया वाच्यायमानमिति गुणीभूतव्यंग्यमेव । यथा । राजर्षिसूनोरपि ममकृद
द्वारसेवनात् । जीवंतमपि मां ब्रह्मन्नन्नमित्यनधारय । अत्र ममम मरणमव
श्यं यद्इति अनुतापातिशयो व्यंग्यः स च जननवेदनपाअगूढएव । अपरस्य र
सादेः रसादिरंगं उत्कर्षकं तथा वाच्यस्यानुरणनरूपमंगं । केचित्तु । वाच्य
स्यापि रसस्य सादृश्यांगमित्याहुः । लक्ष्यदर्शने विशिष्य विवेचयिष्यामः । यथा ।
अयं स रसनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः
करः । अत्र शृंगारः करुणस्योत्कर्षकः । तथाहि । एतत्स्मरयति तं शरिस्त्रवः । क
रमालोकयत्र द्धघरमिद्धेो । तथा च । भट्टगो चितरशनाकर्षणादि विलास
स्मरणं विना लब्धदयात्वात्शोककवेगमधिकं जनयति । वक्रोक्तिपंचकवयोः
प्रतिबिंबितानि दृष्ट्वा दयाननसमागमनभ्रमेण । भूयोपि शेलपदिवीं

॥२१॥

॥२१॥

नयेन गाढमालिंगितो गिरिजया गिरिशः पुनातु। अत्र भावस्य रसः। यथा वाऽय
द स्य सीतेयमास्यै धीरगाधस्यान याऽगुणाः। सुरथो नाम राजा यं समस्तक्षितिमंड
ले। अत्र सुरथविषयो भावो राजविषयरतिभावस्य। एवं भावाभासादीनामपि
बोध्यं। अनुरणनरूपस्यालंकारस्य वाच्यांगत्वं यथा। जनस्थाने भ्रान्तं कनकमृग
तृष्णांधितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितं। कृतालंकारभर्तुर्वदनप
रिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता। अत्र त्वमसदृशी त्वारो
पस्य वमेत्कौटिल्यात् वाच्यस्य रामत्वारोपस्य शब्दशक्तिमूलं प्रतीयमानं रामेण
प्रा साम्यमुत्कर्षकं। अथ कृतो रामत्वं हि मिस्याकांक्षानिवर्तकस्य साम्यस्य वाच्य
सिद्ध्यंगत्वमेव। ना प्रयोगत्वमिति वेत्स। जनस्थानभ्रमणादिरूपस्य साम्यस्य शब्द
शक्तिमूलव्यंग्यतः आगतावगतो रामत्वारोपरूपवाच्यस्य सिद्ध्यंगत्वादे। अनुरण
नरूपस्य वस्तुनो वाच्यांगत्वं यथा। आगत्य संप्रति वियोगविसंष्ठुलांगीमंभो
जिनीं क्वचिदपि क्षपितत्रियामः। एतां प्रसादयति पश्य शनैः प्रभाते तन्वंगि पादपत
नेन सहस्ररश्मिः। अत्र व्यंग्योपक्षेपिता विनापि सिद्धे र * श * विकमलिनी वृत्तांते उ

यथा शक्तिमूलवस्तुरूपनायकवृत्तांतारूपोपांगं । नचायमुपमाध्वनिः रूपकध्व-
निर्वा किं न स्यादिति वाच्यं । तथाविधवस्तुन एव काव्यसर्वस्वत्वेनानुपमानत्वा-
त् । टीकाकृतस्तु । रसस्यापि वाच्यांगत्वेप्येतदेव तंत्रेणोदाहरणमिति वदंति । तेषा-
मयमाशयः । खंडितानुनयनलक्षणेनायकवृत्तांतेन तादात्म्यावगमात् क्षिप्तरतिस्व-
पेणा रसेन वाच्यस्य रविकमलिनीवृत्तांतस्योत्कर्षणमिति रसस्य वाच्यांगतेति । वा-
च्यस्य वाक्यार्थस्यानुपपद्यमानस्य सिद्धिरुपपत्तिस्तस्यांगं निदानं । वाच्यसि-
द्धंगं यथा । भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादं च । मरणं च जा-
लदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनां । अत्र हालाहलं व्यंग्यं । भुजगरोपरूप-
स्य वाच्यस्य सिद्धिकृत् । ननु तस्यैव व्यंग्यता । प्रसिद्धिवशात् तस्यापि [illegible]
रणेनेदं पदं हस्याभिधया विषपदेन द्राग्वेमरलोपस्थितेः । यतः प्रकरणात्सन्नि-
धिवैबलेवतीं अर्थाभिहितार्थविलोपः स्यात् । प्रकरणबलाद्प्रसिद्धार्थस्य प्रा-
गुपस्थितौ तद्विषस्यानवकाशादिति चेत् । न । यत्र प्रसिद्धार्थोपस्थितेनेंतरेणंत-
रमप्रसिद्धप्रकरणादिकमवतरति तत्रैवतद्दोषस्या [illegible]ति चेत् ।

॥२२॥

न्य

लब्धपदत्वात्तस्य सिद्धेः प्रकरणमेव बलवत्। तथा च ब्रूते प्रकरणवशादुपस्थि-
ते मल्लेन लदभुजगजन्यत्वमनुपपद्यमाने ... वाच्यसिद्ध्यङ्गत्वमिति वा-
च्यसिद्ध्यङ्गता। अस्फुटं यथा। अदृष्टे दर्शनोत्कण्ठा दृष्टे वि-
च्छेदभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्। अत्रादृष्टो यथा न भवसि
वियोगो न भवेच्च यथा तथा कुर्या इत्यस्फुटं। सन्दिग्धप्राधान्यं यथा। हरस्तु किंचित्परि-
विवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः। उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास
विलोचनानि। अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं किं वा लोचनव्यापा-
रणं वाच्यं प्रधानमिति संदेहः। प्रान्त्या तु चमत्कारप्रयोजकत्वमिति बोध्यं। तुल्य-
प्राधान्यं यथा। ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यस्तथा मित्रमन्य-
था दुर्मनायते। अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षयं करिष्यतीति
व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यं। तथा हि। अत्र मित्रपदे शमित्रत्वाभिधानं सामवा-
च्यं ... दण्डः ... उपदेशस्यानर्थनिवारणत्वेन तुल्यता। का-
क्वाक्षिप्तं यथा। मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबा-

ष्णुरस्तुः॰ संकीर्णो ह्यभिधानप्रयोजनस्तु यो धनो रूसंधिं करोतु भवतां नृपतिः पणेन॰ अ
त्र मद्धाम्ये वे निव्यंग्यं गुणीकृतं॰ अयमभिसंधिः॰ संधिश्रवणकुपितस्य भीमस्यो
क्तिरियं॰ तथा च प्रतिज्ञातविरुद्धनिषेधाभिधायित्वेन अस्य काकुरियं निषेधं तत चमत्कारस्य
दाक्षेपिका॰ अभावाभावश्चावधारणं तस्य च वाच्यसमकालं प्रतीयमानत्वेन गुणी वाच्यानिर्वाह्य
कृतत्वमेव ध्वनित्वं॰ अत एव काकुव्यंग्यस्य पदार्थस्थानीयत्वेनाक्षिप्तपदस्मृ ग्रहात्
तिप्रसाधितपदं॰ ततश्च यत्र काकुतोपि विलंबेनापि स्थितिस्तत्र ध्वनित्वमेव॰ य
थोदाहृतं गुरुः खेदं खिन्ने इत्यत्र॰ अत्र काका प्रश्नस्येव स्मृतिसाक्षेपो न माध्यात्मः
खेदः कुरुषु योग्य इत्याशयेन॰ अस्तु दूरं चमत्कारे वाच्यमुखनिरीक्षकं यत्र व्यंग्यं॰ य
थाप्राप्तकालाम् तरुणेतरुणाय इत्यादि॰ इत्यष्टौ गुणीकृतव्यंग्यस्य भेदाः कथिताः॰ एतेषां वा
च्योन्ययोगात् ध्वनिभेदैश्च संकरसंसृष्टिभ्यां योगाद्बहवो भेदाः संभवंति॰ संकलनेना
स्य ध्वनेश्च भेदाः॰ व्यंग्यस्य त्रिरूपत्वात्॰ तथा हि॰ किंचिद्वाच्यतां सहते किं
चित्त्वन्यथा॰ तत्र वाच्यतासहं वस्त्वलंकाररूपं रसादिलक्षणस्त्वर्थः स्वप्नेपि न वाच्यः
शृंगारादिशब्देन शृंगारशब्देनोच्यमानोपि कदाचिदपि न चमत्कृत इति यावत्॰ र

॥२३॥ 23 ॥२३॥

सादृश्यस्यात्रापि पदेन नानावादीनां परिग्रहः· चित्रभेदास्त्वलंकारनिरूपण एव निरू
पयिष्यंते· इदं त्ववधेयं· शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं· गुणप्राधान्यतस्त
त्रस्थितिः शब्दार्थचित्रयोः· न तु शब्दस्य चित्रे यथा चित्रता अर्थस्य चित्रे वा शब्दस्य·
तथा केचिच्छब्दचित्रमेवेच्छंते केचिदर्थचित्रमेव· अस्माभिस्तूभयमिति· ॥ १ ॥

॥ ॥ः॥ श्री ॥ ॥ इति [illegible] काव्यपरीक्षायां काव्यभेदो नाम द्वितीय उल्लासः ॥ २ ॥ः॥

अथ दोषस्वरूपमाह· येषां ज्ञानाच्चमत्कारो न सम्यगुपजायते· सालंकारगुणोपेत
ते दोषाः परिकीर्तिताः· अत्र काव्ये· दृष्टो हि लोके सगुणोपि सालंकारोपि सदोष
त्वेन ज्ञातो न तथा चमत्करोतीति तथा काव्यमपि· वस्तुतस्तु· रसापकर्षजनकज्ञा
नविषयत्वं दोषत्वं· अपकर्षस्तु रत्याद्यवच्छिन्नचैतन्यस्य आनंदांशे लेशेन स्थिति
स्तद्विषयविशेषप्रदर्शनार्थं विभज्य पदादिदोषानाह· दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्य
प्रयुक्तमसमर्थं· निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं· संदिग्ध
मप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टं· अविमृष्टविधेयांशं विरुद्धमतिकृत्समास
गतमेव· श्रुतिकटु पदं सर्वत्रान्वयः· श्रुतिकटुत्वं च मुख्यार्थापकर्षकत्वे सति ॐ
दुष्टमेव·
वरणस्य· यद्यपि सर्वे दोषा वा[illegible]र्द्वयोर्दोषयोरेवांतर्भवितुमर्हंति· तथापि त

ऽव्यंजकवर्णत्वरूपं· वीरादिषु दुष्टतयाऽतिप्रसंगवारणाय रूत्वं तं· नच प्रतिकू
लवर्णानामन्यथासिद्धिः उपधेयसंकरेप्युपाधेरसांकर्यात्· तथाहि· अत्र प्रकृतरस
व्यंजकाभावाद्रसबोधरूपं कार्यं न जायते· प्रतिकूलवर्णैस्तु प्रकृतरसव्यंजकैर्वर्णैः
प्रतिरुद्धत इत्यनयोर्भेदः· वर्णानां रसव्यंजकत्वं तत्प्रातिकूल्यं च वक्ष्यते· यथा· अनं
गमंगलगृहापांगभंगितरंगितैः· आलिंगितः स तन्वंग्या कार्तार्थ्यं लभते कदा· अत्र का
र्तार्थ्यमिति· च्युतसंस्कृति व्याकरणव्युत्पत्तिहीनं· असाध्विति यावत्· यथा· प्रजाद्ववं
गादरविंदनाभेः शंभोर्जटाजूटतटादिवापः· मुखादिवाथ श्रुतयो विधातुः पुरान्नि
रीयुर्मधुजिह्वजिन्व्यः· अत्रारविंदनाभेरिति· आमंगामध्यस्यादिवा· अत्रासाधुत्वज्ञाना
दन्वयबोधस्यागमनमेव दूषकताबीजं· अप्रयुक्तं यदाम्नातमप्यभियुक्तैर्निषिद्धप्रयो
तं· यथा· यथायं दारुणाचारः सर्वदैव विभाव्यते· तथा मन्ये दैवतोऽस्य पिशाचो राक्षसो
ऽथवा· अत्र दैवतशब्दो देवतानि पुंसि वेत्याम्नातोऽप्यालंकारिकैर्निषिद्धप्रयोगः· अत्रा
भियुक्तासम्मतोल्लेखनप्रयोजनाभिसंधानाभावरूपार्थप्रतीतिमांथर्यं दूषकताबी
जं· असमर्थमनुपसंपादनं विनाभिप्रेतार्थावबोधकं· यथा तीर्थान्तरेषु स्नाने

॥२४॥

२५

॥२४॥

नस मुपार्जित सत्क्रियः स्फुरत्तो तस्विनी मेष हंसं प्रति सादरं. अत्र हं तीति गमनार्थे.
उद्धति पद्धती सादा वुपसंदानेन गति बोधकत्वेन नतस्य ठवे प्रकल्यं. गमन बोधं प्रति
स्वरूपायोग्यत्वं दूषकतावीजं. निहतार्थं तद्यस्त्रं प्रसिद्धार्थ प्रतीति व्यवधानेनाप्रसिद्धा
र्थ स्यशक्त्या बोधकं. सामग्रीसद्भावेन प्राणप्रसिद्धार्थ प्रतिपत्तौ नायं दोषः शक्त्ये
ति विशेषणात् अप्रसिद्ध शक्य व्यंजकेनायं दोषः. यथा. पावकरसार्द्र पाद प्रहार

शोणित कचैर्पितेन. भुधा साध्वस तरला विलोक्य परिचुंबिता सहसा. अत्र शो
णित पदं. अत्र रुधिर लक्षणे नार्थे नो स्वीकृतत्व रूपो यो व्युत्पधीयत इति प्रकृता
प्रतीति मांथर्ये दूषकतावीजं. अनुचितार्थं प्रकृत विरुद्धार्थे. यथा. तपस्विभि र्या
सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते वपा. प्रयांति तामाशु गतिं तपस्वि
नो रणाध्वमेधे पशुतामुपागताः. अत्र पशु पदं उपन्लोक्य मानस्य कातरतामभि
मिव्यनक्तीत्यनुचितार्थं. निरर्थकं अर्थः प्रयोजनं प्रकृतात्स्वाद परितोषणांत
द्रहितं. उत्फुल्ल कमलके सर परागगौर द्युते मम हि गौरी. अभिवांछितं प्रसिद्ध
तु जननि भवत्याः प्रसादेन. अत्र हि पदं. निराकांक्षतावीजं. अवाचकं संकेतवि

त्वं दूष१

रथाद्बोधकं॰ असमर्थे नासंकेतः लाक्षणिकेनाबोधकत्वमिति न तयोः प्रसं
गः॰ यथा॰ वंध्यकोपस्य निहंतुरापदां भवंति वश्याः स्वयमेव देहिनः॰ अमर्षशून्ये
न जनस्य जंतुना न जातहार्देन न विद्विषादरः॰ अत्र जंतुपदमदातृत्वे प्रयुक्तं
तत्र वचनाभिधायकं॰ न चातास्यार्थानुपपत्त्या लक्षणया बोधकमिदमस्त्विति
वाच्यं॰ यदा प्रयोजनप्रतिपादनेच्छाविरहात् लक्षणाया अनवसरत्वादस्य दूषण
त्वात्॰ त्रिधेति॰ व्रीडाजुगुप्सा अमंगलव्यंजकत्वात्॰ सभ्यवशीकरणसंपत्तिः
श्रीस्तां सांकेतीति रश्रुतेरश्रुतिरस्यनेन नश्लीलमश्लीलं॰ एतदेवात्र॰ एतदे
वात्र दूषकतावीजं॰ क्रमेण यथा॰ साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते॰
तस्य धीशालिनः कोन्यः सहेतारालितां भ्रुवं॰ मंजुमंथरगतिः पयोमुचां शीकरौघ
वहनभ्रमादिव॰ केतकीवनविहारकौतुकी वायुरापुरभवन्मनोभुवः॰ पितृव
सतिमहं व्रजामितां सह परिवारजनेन यत्र मे॰ भवति सपदि पावकान्वये ह
दयमशेषितशोकशल्यकं॰ एतेषु साधनवायुपितृवसतिशब्दा व्रीडादिव्यंज
काः॰ संदिग्धं तात्पर्यसंदेहास्पदीभूतार्थद्वयोपस्थापकं॰ यथा॰ आलिंगितस्त

॥२५॥ 25 ॥२५॥

त्रनवाक्तं परायेन य भ्रिया· आशीः परं परां वध्यां कर्णोत्क्षत्वा कृपांकुरः· अत्र वंद्यामि
ति किं वंदीकृतायां किं वा नमस्यायां प्रयुक्तमिति संदेहः· अत्रार्थानिश्चय एव दूष
कताबीजं· अप्रतीतमिति· प्रतिप्रति शास्त्रे इतं ज्ञानं न प्रतीतमप्रतीतं· यत्किंचि
च्छास्त्रपरिभाषितमित्यर्थः· यथा· सम्यक्ज्ञानमहाज्योतिर्दलिताशयतानुषः· वि
धीयमानमप्येतेन्न भवेत्कर्मबंधनं· अत्राशयशब्दो वासनापरपर्यायो योगशा
स्त्र एव प्रसिद्ध इति· विरलप्रयोगत्वेन झटिति अप्रत्यायकत्वमेव दूषकताबीजं·
ग्राम्यमिति· ग्रामोऽविदग्धस्तत्प्रयुक्तं ग्राम्यं· यथा· राकाविभावरीकांतसंक्रांतद्यु
ति ते मुखं· तपनीयशिलाशोभो कटिश्च हरते मनः· अत्र कटिरिति· श्रोणीनितंबा
दिकमौपनागरिकं· कटिपदं तु अविदग्धमात्रप्रयोज्यं· वक्तुरविदग्धतानुसंधा
नं रसस्यापकर्षकमनुभवसिद्धं· तदेव दूषकताबीजं· अत्र कटिपदे अश्लील
त्वसंभवेपि उपाधेरसंकराद्दोषपार्थक्यं· नेयार्थं तत्तु· यत् रूढिप्रयोजनाभ्यां
विना आभासरूपया लक्षणया प्रयुक्तं· यथा· वस्त्रवैदूर्यचरणैः प्रातर्युक्तं न
भस्तलं· काश्मीररागाक्रमितं विलोक्य इवाबभौ· वस्त्रवैदूर्यचरणैरित्यंबरर
लपादैरित्यर्थे नेयार्थं· दूषकताबीजं तु केवलमुख्यप्रतिसंधानेन वैरस्यापा

दुष्कत्वं· अथ समासगतमेव दुष्टमिति संबंधः· अन्यत्तु केवलं समासगतं च· क्लि-
ष्टतया ततो वाक्यार्थप्रतीतिर्विलंबिता भवति· निहतार्थे पदार्थोपस्थितिरेव विलं-
बितेति ततोस्य भेदः· यथा· अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः· सदृशं शोभते-
ऽत्यर्थं भूपाल तव चेष्टितं· अत्रात्रिलोचनसंभूतस्य चंद्रस्य ज्योतिरुद्गमेन भासिभिः
कुमुदैरित्यर्थः· तथा च सामान्यशब्दात् पदात् संकरणा यवतारविलंबे विलंबा-
द्द्वितीयस्य कुमुदस्योपस्थितिरिति क्लिष्टत्वं· अविमृष्टः प्राधान्येनानिर्दिष्टो विधे-
यांशो यत्र तदविमृष्टविधेयांशं· प्राधान्यं तु विधेयताप्रतीतियोग्यत्वं· तदुक्तं· यच्छब्दयो-
गः प्राथम्यं सिद्धत्वं चाप्यनूद्यता· तच्छब्दयोगऔदासीन्यं साध्यत्वं च विधेयता· तथा उद्देश्यं
विधेयं च यदि पृथक्पदाभ्यामुपतिष्ठेते तत्र प्राधान्यबुद्धिविषयात्प्राधान्यं विधीयते· एवं ताव-
न्मानितिवत्· न तु समासे· अन्यथा वन्हिमस्यैव तदित्याद्यभिधीयेत· यथा· मूर्ध्नामु-
द्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्याम-
हिम्नां· कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह
नगरीरक्षणे यत्प्रयासः· अत्र [illegible] मिथ्यां नानुवाद्यमपि तु विधेयं· अन्यथा यदि तदेव
मिथ्यामहिमत्वं जातं तदानीं नगरीरक्षणे प्रयासो नानुचितः· यादि विधेयं स्यान्न तदा

॥२६॥ मरि २७

॥२६॥ ६३

नादृष्टो नापि कर्मणा यन्मयस्त्वं तदा कृतं तदिदानीं मिथ्या वचनं व्र. मतस्त्वनारीरक्षणे प्यस-
मर्थ इति प्रतीतिः स्फुरति. तच्च मिथ्यात्वं बहुव्रीहावन्यपदार्थप्रधाने गुणीभूतमित्यवि-
मृष्टविधेयांशता. विरुद्धमतिकृत् यत्तात्पर्यविषयीभूतार्थधीप्रतिबंधकीभूतासभ्यार्थ-
धीजनकत्वं. अनुचितार्थाश्लीलयोरर्थानां न परस्परप्रतिबंधकता. निहतार्थे विलंबे-
न प्रतीतिरिति तेभ्यो भेदः. यथा. सुधाकरकराकारविशारदविचेष्टितः. अकार्यमित्र-
मेको सौ तस्य किं वर्णयामहे. अत्र कार्यं विना मित्रमिति विवक्षितं. अकार्येषु मित्रमिति
तु प्रतीयते. अव्ययीभावे लक्षणानुसंधानविलंबात्कर्मधारयेण झटिति कुकार्यप्र-
तीतेः समासावयवस्य नञो निंदार्थत्वात्तदुक्तं. तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधि-
ता. अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः. यथा वा. चिरकालपरिप्राप्तलोचना-
नंददायिनः. कांताकांतस्य सहसा विदधाति गलग्रहं. अत्र गलग्रहो रोगविशेषः. तेन च
समुदायशक्तेरालिंगनेनयोगः. समुदायशक्ते र्बलवत्वाद्रोगस्य झटिति प्रतीतिरिति
विरुद्धमतिकारिता. यथा वा. अपि चः स्वयं विषादी हरति विषादं प्रपन्नानां. ईशोपि नैक्ष्य-
दनिर्नागपूर्तीपतिः सोऽव्यात्. अत्र भवानीपतिशब्दो भवान्याः पत्यंतरे प्रतीतिं करोति. अ-
स्यथा भवस्यैवाभिदध्यात्. प्रकृतिकं तु समासगतं यथा. साचहूरे सुधासांद्रतरंगिनविलो-

जना· वर्हिर्निर्हृदनार्हो यं कालभ्रष्य समुपागतः· एवमन्यदपि ज्ञेयं· अपास्य च्युतसंस्कारम
समर्थं निरर्थकं· वाक्येपि दोषाः सन्त्येते पदस्यांशेपि केचन· केचन न पुनः सर्वे· एते पददोषाः
साकांक्षतानां पदवृत्तयो यदि भवन्ति तदा वाक्यदोषा इत्युच्यंते· यथा· अनंगमंगलगृहापां
गतंगितरंगितैः· आलिंगितः सदीर्घाक्ष्या कान्तोर्थैर्लभते कदा· एवमन्ये स्युर्गमा इति नोदाहृ
ताः· क्लिष्टादित्रयं तु क्रमेणोदाह्रियते· धम्मिल्लस्यन कस्य प्रेक्ष्य निकामं कुरंगशावाक्ष्याः·
रज्यत्यपूर्वबंधव्युत्पत्तेर्मानसं शोभां· अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति
संबंधे क्लिष्टत्वं· न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः· सोप्यत्रैव निहंति राक्षस
कुलं जीवत्यहो रावणः· धिग्धिक्शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्गग्राम
टिकाविलुंठनवृथोच्छूनैः किमेभिर्भुजैः· अत्रायमेव न्यक्कार इति वाच्यं· तथैव न्यक्कार
स्य विधेयत्वप्रतीतेः· अत्र वशब्देन नाविपरीतात्कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्ये
ति· किंच· खंडवाक्यार्थबोधदशायामेवायं दोषो न तु महावाक्यार्थबोधदशायां तदा
मूलालंबनपदस्यैतौ विधेयस्योद्देश्यस्य च पौर्वापर्यबाधविरहात्· स्मितक्षमारक्तभुवः शी
वालिंगितमूर्तयः विग्रहक्षपणेनाद्य शेरते ते गतासुखाः· अत्र क्षमादिगुणयुक्ताः सुखमास
त इति विवक्षिते हतासुइति प्रतीतिः· अथ पदैकदेशे यथासंभवमुदाहरणं· अलमतिचप

॥२७॥

॥२७॥

त्वन्मुखस्य समायोपमत्वात्सपरिणतिविरसत्वात्तां गमेनां गतायाः। इति यदि शान्त त्वस्त
त्वमालोचयामस्तदपि न हरिणाक्षी विस्मरस्येतरां सा। अत्र त्वाद्दितिकष्टं। यथा प्याक्षां विन्त्रम से
मं तु नानां संपादयित्री शिखरैर्बिमर्त्ति। बलाहकच्छेदविनक्तरागाम कालसंध्यामिव धातु
मत्तां। अत्र मत्ताशब्दः क्षीवार्थे निहतार्थः। आदावंजनपुंजलिप्तवपुषां श्वासानिलोल्लासित
प्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशां। संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
नेत्रश्रेणीनामिव पानकर्म कुरुते कोमंकुरं गोक्षणा। अत्र दृशामिति बहुवचनमनर्थकं। कुरं
गोक्षणाया एकस्या एवोपादानात्। न च व्यापारेत्र दृक्कुरंगीशब्दो वर्त्तते। अंजनलेपादीनां तत्रासंभ
वात्। अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे। नववारिधरोदयादहोभिर्भवित
ते व्यं च निरातपत्वरम्यैः। अभवितव्यमिति रूतमिस्पर्थे अवाचकं। आमिषेलवमातिपारेभितवर्णं। नघु
तरमुद्वहरति शठः परमार्थवस्तु सहृदयं वहति पुनः कालकूटघटितमिव। अत्र पेलशब्दः
यः सूयते स दारुस्ताल्वाङ्कुरस्योतस्विनीजले। अस्माकं भाग्यवशात्तः सोयं नयनगोचरः। अत्र सूय
शब्दः प्रिनयग्रणायेकके तनं सततं योमवदंगतादृशः। कथमेष सतत दर्दीस्यतां तदभिप्रेतप
दं समागतः। अत्र प्रयशब्दः। कस्मिन्कर्मणि सामर्थ्यमस्य नोत्पद्यते तरां। अयं साधुचरस्तस्माद
ञ्जलिर्बध्यतामिह। अत्र किं पूर्वं साधुरुत साधुषु चरतीति संदेहः। किमुच्यते स्यरूपालमोलिमा

जा सहासमलैः सुदुर्लभंवचोबाहोऽजो यस्य विनाश्यते · अत्र वचः शब्देन गीः शब्दो लक्ष्यते ·
अत्र पूर्वपदवदुत्तरपदमपि परिवर्तनं न सहते · जलध्यादौ तूत्तरपदमेव · प्रतिकूलवर्णमु-
पहतलुप्तविसर्गं विसंधिहतवृत्तं · न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तं · अप-
दस्थपदसमासं विमतपरार्थप्रसिद्धिरिति हीनं · भग्नप्रक्रमम भवन्मतयोगं वाक्यमेवं तथा ·
रसानुगुणत्वं च वर्णानां वक्ष्यते · तद्विपरीतं प्रतिकूलत्वं · यथा शृंगारे · अकुंठोत्कंठया पू-
र्णमाकंठं कलकंठि मां · कंबुकंठ्याः क्षणं कंठे कुरु कंठार्तिमुद्धर · अत्र मधुरवर्णत्वमुचितं · त-
था रौद्रे उदाहृते हृतमनुमतमित्यादौ विकटवर्णत्वं दीर्घसमासत्वं चोचितं · उपहतः अ-
त्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् उपहतलुप्तविसर्गं · यथा · धीरो विनीतो निपुणो निर्वि-
कारो नृपोत्र सः · यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः · अत्रैतयोर्नैरंतर्येणाने-
कस्थानोपहतविसर्गत्वेनैव दूषकता · तथा · उपहतेत्यादिवत्तुर्षु पतत्प्रकर्षे च बंधशैथि-
ल्यापादकत्वमेव दूषकताबीजं · संधेर्वैरूप्यं विश्लेषः · यथा · राजन्विभांति भवतश्चरिता-
नि तानि इंदौ द्युतिं दधति यानि रसातलेंतः · धीदौर्बले अतितते उचितानुवृत्ती आतन्वती
विजयसंपदमेत्य भातः · अत्र संहितां न करोमीति स्वेच्छया सकृदपि दोषः · प्रगृह्यादिहेतुके-
त्वसकृदेव तदुक्तं जातयतिमं तं रसानानुगुणं च वदंते · क्रमेणोदाहरणं · अम्लतमम्लीकः संदे-
तं

हे मधुकर त्वयि नान्यथा मधुरमधिकं चूतस्यापि प्रसन्नरसं फलं· सकृदपि पुनर्मध्य
स्थः सन्नेरसान्तरविज्ञो नो वदतु यदि हान्यत्स्वादुः स्यात्प्रियारदनच्छदात्· अत्र यदि ह
न्यत्स्वादुः स्यादिति यतिभंगादसमर्थ्यं· हीनपदत्वं बुधलोककविबंधो विप्रसहस्रसमाश्रय
देव· मुग्धाविदग्धसमांतररत्नकोषिगतः कुवयंवतवेते· तस्य व्यंजकमेवतद्वतं· न्यू
नपदं यथा· त्वयि निबरतेः प्रियवादिनः प्रणयभंगपराङ्मुखचेतसः· कमपराधलवं मम
पश्यसि त्यजसि मानिनि दासजनं यतः· अत्रापराधलवमपीति वाच्यं· अत्र दूषकतो
बीजं स्फुटमेव· पराभिमतस्यानभिहितवाच्यस्य न्यूनपद एवांतर्भावः· अधिकपदं
यथा· इदमनुचितक्रमश्च पुंसां यदिह जरास्वपि मान्मथो विकारः· यदपि च न कृतं नि
तंबिनीनां स्तनपतनावधि जीवितं रतं वा· अत्र कृतमिति कृतं प्रस्तुतक्रमभंगमात्रं वहति·
अत्राकांक्षाविरहः स्फुट एव· स एव दूषकताबीजं· कथितपदं यथा· अधिकरतलतल
ल्पं कल्पितस्वापलीलापरिमलननिमीलत्पाण्डिमा गण्डपाली· सुतनु कथय कस्य व्य
जयत्यंजसैव स्मरनरपतिलीलायौवराज्याभिषेकं· अत्र लीलेति· अत्रापि दूषकता
ननु
ब· तद्वचमत्कारित्वमेव दूषकताबीजं· पतत्प्रकर्षं यथा· कः कः कुत्र न घुर्घुरायि

29

त भूरीघोरोघुरेत्कारः कः कः के कमलाकरं विकमलं कर्तुं करी नोद्यतः॥ के के का
नि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः॥ सिंहीस्नेहविलासबद्धवसतिः पंचाननो वे
र्तते॥ समासभेदेन यत्तं॥ यत्र विशेष्यं पुनरन्यत्पदं जनितान्वयबोधं पुनरन्यत्समाहृतं तत्॥ यथा॥
कैंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो झंकारो रतिमंजरीमधुलिहां लीलाच
कोरीध्वनिः॥ तन्व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्कंकणक्वाणः प्रेमतनोर्नु
बो नवयौवनोल्लास्यापवेल्लु ध्वनिः॥ तन्व्यत्र क्रियाकारकभावेनान्वयबोधे जनिते पु
नर्विशेषणान्वये निराकांक्षत्वमेव दूषकताबीजं वाच्यं॥ तत्तु न घटते॥ विशेषणांशे
तात्पर्यसत्वेन तात्पर्यविषयीभूतान्वयबोधाजनने न तद्घटिताकांक्षायाः सत्वादिति चे
त्॥ साध्ववोचः॥ किं त्वत्र तात्पर्यग्राहकमुत्कटं नास्तीति तद्विलंबेनान्वयबोधवि
लंब एव दूषकताबीजं॥ यत्र तु तद्ग्राहकमस्ति तत्र न दोषत्वं॥ यथा॥ नववयोल्लास्याप
मीतं तथा॥ अत्र तु भवस्यस्योत्कटग्राहकस्य सत्वतः एवं॥ अयमपि सन्नवेयथुं जनयति
स्वास्थः प्रमाणाधिकस्यत्र प्रमाधिक्येनैवमन्यस्येसेवे पथुजननात्क्रियान्वये पि
न वाक्यसमाप्तिः॥ एवमन्यत्रापि बोध्यं॥ अपदस्थपदमस्थानस्थपदं॥ यथा॥ द्वयं
गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः॥ कलाच सा कांतिमती कला

तथा गर्भितं · यत्र वाक्यस्य मध्ये वाक्यांतरमनुप्रविशति ।।

वत्सस्त्वमस्य लोकस्य च नेत्रकौमुदी · अत्र त्वंपदानंतरं चकारो युक्तः · तदेव तस्याः स्म
नुद्धेयतास्यात् · इदमत्रावबोध्यं · अर्थांतरैकवाचकं · यत्र द्वितीयार्धैकवाचकशे
षं न प्रथमार्धं तत् · तथा संकीर्णं · यत्र वाक्यांतरपदानि वाक्यांतरे नुप्रविशंति तत् ·
तथा अक्रमं · यत्र यदुत्तरं यस्य दोषादानमुचितं तदन्यत्र तु पादानं तत् · एतानि च वा
क्यपदेषु पतितानि दूषणानि अस्मिन्नपदस्य पद एवांतर्गतानि · संकीर्णस्य
क्लिष्ट एवांतर्भाव इति केचित् · अपदस्य समासं यथा · अद्यापि स्तनशैलदुर्गविषमे
सीमंतिनीनां हृदि स्थातुं वांछति मान एष धिगिति क्रोधादिवालोहितः · उद्यद्दूरतर
प्रसारितकरः कर्षत्यसौ तत्क्षणात् फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ·
अत्र क्रुद्धस्योत्साहो समानो न कृतः · कवरुणोल्लुनकृतः · विमतः अकृतविरुद्धः · परार्थोय
त्र द्विमतपरा[illegible]र्थं · यथा · राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी · गंधवद्रु
धिरचंदनोक्षिता जीवितेशवसतिं जगाम सा · अत्र प्रकृतरसविरुद्धः शृंगारस्य व्यंज
को परो र्थः · प्रसिद्धिहतं यत्र प्रयुक्तं प्रसिद्धिरहितं · यथा · महाप्रलयमारुतक्षुभित
पुष्करावर्तकप्रचंडघनगर्जितप्रतिरवानुकारी मुहुः · रवः श्रवणभैरवः स्थगितरो
दकंदरः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः · अत्र रवो मंडूकादिध्वनिषु प्रसि

30

यतिरिक्त७

॥३०॥

...तत्त्वरूपे सिंहनादे । घुसृणितवसना लंकारा यां कदाचन कौमुदी महसि सुदृशि स्वे
च्छयास्यां गतो स्तसमस्तोद्भिषुः तदनु भवतः कीर्तिः केनाप्यगीयत येन साप्रिय गृहमगान्मु
क्ताशंका कनासिपु नवदः । अत्राप्यगाम्नीपि कीर्तिर्ज्योत्स्नावत्प्रकाशरूपा कथितेति
लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टं । भग्नः प्रक्रमः प्रस्तावो यत्र तत्तथा । यथा । ना
थे निशाया नियतेर्नियोगादस्तं गते हंत निशापि याता । कुलांगनानां हि दशानुरूपं
नातः परं भद्रतरं समस्ति । अत्र गतेति प्रक्रांत्या तेति प्रवृत्ते प्रक्रमो भग्नः । गता
निशापीति युक्तं । ननु कथितपदस्य दुष्टत्वाभिधानात्कथमेकस्य पदस्याभिन्नप्र
योग इति चेदुच्यते । उद्देश्यप्रतीतिनिर्देश्ये एकविषयः । एकप्रयोगनिबंधस्याप्र
स्तुततादृशि विषये तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः । तथा हि । उद
ति सविता ताम्रस्ताम्र एवास्तमेति च । संपत्तौ च विपत्तौ च महतामेकरूपता । अत्र रक्त
एवेति यदि क्रियेत तदा पदांतरमतिपादितः स एवार्थोऽर्थांतरतयेवाभासमानो नैक
रूप्यमावहति । ननु पर्यायशब्दानां शक्यतावच्छेदकैक्यनियमात् कथमन्यत्वेन
प्रतीतिरिति चेदुच्यते । यन्मते शाब्दबोधे शब्दोभासते तन्मते रक्तादिशब्दांतरस्य भा
नादैकरूप्यासंभवात् । अयमेव मतद्वयेष्टो योगः संबंधो यत्र तत्तथा । विवक्षितसं

॥३०॥

बंधं प्रति बोधं प्रति स्वरूपायोग्यमिति यावत्। तेन विधेयाविमर्षे नातिव्याप्तिः। तत्र
रचनान्यत्वेन संबंधोपपत्तेः। यथा। येषां स्विद्दशोन्मज्जनसरितः पीताः प्रतापोष्मभिर्ली
[नं] ना पानमनुस्वेदनमतश्छायास्तु येः कल्पिताः। येषां कुकूलतयः शैताः मरपतिरक्षोभाः क्षा
पाया हि लोके किं तैस्तत्परितोषरि विहितं किंचित्स्वादाचितं। अत्र ये रिस्य त्र विशेषस्या
प्रतीतिः। क्षा चारिक्षिरिति पाठं तु ज्येत संबंधः। यावद्यदर्थपरामर्षकतत्सदेन सविशे
[चा] षणविशेष्यतावोपपत्तौ सकलतत्पदार्थक्षपरिणामरमेदानन्यस्यन्याप्यत्वात्। यथा
वा। संघाकांडोरूताक्षोनरवक्षिरणालसत्केसराली करालः। प्रत्यग्रालक्तकाताम्रसरणि
सबोले मंजुमंजीरमंतः। नर्तुर्नसानुकारे जयति नितरनु स्वच्छलावण्यवापीसंभूतांभोजशो
भांविदधद्भिनवो दंडपादो भवान्याः। अत्र दंडपादेन तानिजतनुः प्रतीयते। नवानीसं
बंधिनीत्वविवक्षितात्। ननु स्वात्मादिशब्दानां प्रधानक्रियान्विता न्वयित्वमुक्तेः। अर्थो
दुष्टः कष्टो व्याहतश्च ननुरुक्तं प्रक्रम ग्राम्याः। संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धः। अवनी
[चा] कृतः सनिमानियमविशेषविशेषपरिवृत्ताः। साकांक्षोऽपदमुक्तः सहचरभिन्नः प्रका
शितविरुद्धः विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः। इत्येते प्राचीनैरर्थदोषाः क
थिताः। तेष्वपुष्टार्थशब्देन दोषाः तन्न नवंतीति न पृथक् प्रतिपादिताः। तथाहि। पुष्टं चार्थ्यमनुल्ले

एवं पुनरुक्तस्ये... अत्राप्युनारुक्तिनि... [illegible] पदार्थः पुनरुक्त इति युक्तो निरर्थके अधिकपदे ...वांतर्भावि
...स्याधिक्ये...तर्भावः [illegible]

एवं पुनरुक्तस्य

र्थः यस्मान्नविद्यते पुष्टं यत्रेति नञ्समासः तथा च प्रकृतवाक्योद्दिष्टोत्कर्षहेत्वर्थक
स्यापुष्टार्थस्य अधिकपदे निरर्थके वांतर्भावः यथा अतिविततगगनसरणिप्रसरण
परिमुक्तविश्रमानंदः मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति अत्रातिवि
तत्वादयोर्था अपुष्टाः इति युक्तो स्याधिकप[दे] निरर्थके वांतर्भावः सदामध्ये यासा
मियममृतनिःस्यंदसरसोसरस्वत्युद्दामा वहति बहुमार्गा परिमलं प्रसन्ना एता घनप
रिचिताः केनमहतां महाकाव्यव्योम्नि स्फुरितमधुराया तु रुचयः अत्रार्थप्रतीतिर्विलं
बेनेति क्लिष्टेंतर्भावः [illegible] समुचितः अस्यार्थः अमृतं सुधाम
तं च रसो माधुर्यं शृंगारादिश्च सरस्वती वाणी नदी च मार्गा रीतिः पंथाश्च परिमलं
चमत्कारः सुगंधं च प्रसादं स्फुटव्यक्तं स्वच्छकांतिश्च घनो निगाढो मेघश्च परिचिता अस्य
ताः प्रसन्नाः संबद्धाश्च रुचयः अभिसंधयः कांतयश्च महतां कवीनामादित्यानां च तै
ग्राह्यत्वात् एवं क्लिष्टत्वानिंदितत्वा वा पुनरन्यथाहृतरूपस्य आहतस्य अनुचितार्थे
वांतर्भावः यथा जगति जयिनस्ते ते भावा नवेंदुकलादयः प्रकृतिमधुराः संत्येवान्ये मनो
मदयंति ये मम तु यदियं याता लोके विलोचनचंद्रिका नयननविषयं जन्मन्येकः स एव महोत्स
वः अत्र नवेंदुकलादयो यंति जंतिवंस्य ग्राह्याः स एव चंद्रिकात्वमुत्कर्षार्थमारोपयतीति

॥३२॥

व्याहतस्यानुचितार्थेंतर्भाव उचित। एवं पुनरुक्तस्यापि पदे निरर्थके वांतर्भावः। पुनरुक्तो-
दाहरणं तु कृतमनुमतमित्यादि। अत्राङ्गीनाङ्गीनेति भवद्भिरिति चोक्ते किरीटिपदार्थः
पुनरुक्त इति पुनरुक्तोधिकपदे निरर्थके वांतर्भावः। तथा दुःक्रमस्य अनुचितार्थे। यथा। भूपा-
लरत्न निर्दैन्यप्रदानप्रथितोत्सव। विश्राणय तुरंगं मे मातंगं वा मदालसं। अत्र मातंगस्य
प्राग्देयमुचितमितीदमनुचितार्थं। एवं ग्राम्यो ग्रामसंभवो विरस्य प्रतिपादितः स्वरिरंसा-
दिः तस्याप्यनुचितार्थेंतर्भावः। यथा। स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपै-
ति ते। तदयि सांप्रतमाहर कूर्परं त्वरितमूरुमुदंचय कुंचितं इदमप्यनुचितार्थं। तथा सं-
दिग्धस्य संदिग्धएवांतर्भावः। यथा। आलिंगितस्तत्रभवानिति। एवं निर्हेतोर्न्यूनपदे। यथा।
गृहीतं येनासीः परिभवभयान्नोचितमपि प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयाद्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भव-
ते। अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति न्यूनपदेतर्भावः। एवं प्रसिद्धिविरुद्धस्यानुचिता-
र्थेतर्भावः। उदाहरणं तु पूर्वमेव प्रसिद्धिपरिहीने महाप्रलय इत्यादि दत्तेनैव मंतव्यं। अ-
त्र रवः सिंहनादेनुचित[illegible]तार्थं। विद्याविरुद्धस्याप्यनुचितार्थे। यथा। सदा स्नात्वा निशी-
थिन्यां सकलं वासरं बुधः। नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च। अत्र प्रहेप

रागादिकं विनाशयतोऽस्नानं धर्मशास्त्रे निषिद्धमितीदमप्यनुचितार्थं· एवमेकत्रांगीनिर्दि
ष्टाने कार्यस्वरूपमनवीक्षितत्वं न दोषः· किं तु गुणाभावाः· उक्तिवैचित्र्याभावेन माधुर्य
स्यानवीक्षितत्वरूपस्य गुणस्य वक्ष्यमाणत्वात्· अतोऽत्र गुणाभावादेव रसापकर्ष इति·
यथा· प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं· संतर्पि
ताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं· तथा नियमपरि
वृत्तेस्यापि न्यूनपदत्वं एवांतर्भावः· नियमस्य शब्दात् प्रतिपत्तिर्नियमपरिवृत्तिः· यथा· य
त्रानुल्लिखितार्थमेव निखिलं निर्माणमेतद्विधेरुत्कर्षप्रतियोगिकल्पनमपि न्य
क्कारकोटिः परा· याताः प्राणभृतां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्याभासमणीकृताश्म
सु मणेरश्मत्वमेवोचितं· अनुल्लिखितार्थमिति द्विष्टं नाम कं· अत्र छायामात्रमणी
कृताश्मसु मणेस्तस्याश्मत्वेनोचितेति स नियमस्तत्र वाच्यः· तथा कृते गुणानंतरव्यवच्छेदेन
निंदातिशयप्रतीतेः· आहृतमणोऽस्तगणनायां चितामर्षतरणमनुचितमित्यर्थः· क
वितापर्विषयः सिद्धमिति· तथा अनियमपरिवृत्तस्याधिकपदे· अविवक्षितनियमस्य प्र
वृत्तिप्रतिपादनं अनियमपरिवृत्तिः· यथा· वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाध
रस्ते बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः· वाहिन्यः पार्श्वमेताः क्ष

॥३२॥ ॥६२॥

मपि नवतो नैव मुंचं समीक्षणं पृच्छं तमोनसेस्मिन् कथमवनिपततेतं बुधानाजिनो
षः अत्र शोणपवेति नियमो नेवाच्यः पिपासोर्जलमात्राभिलाषवणितरश्यौवक्षेदस्या
विवक्षितत्वात्. तथा विशेषपरिवृत्तस्य न्यूनपदे. यथा. श्यामां श्यामलिमानमानयत
भोः सांद्रैर्मषीकूर्चकैर्मंत्रं तंत्रमपि प्रयुज्य हरत श्वेतोत्पलानां स्मितं. चंद्रं चूर्णयत क्षणाच्च
कणशः कृत्वा शिलापट्टके येन द्रष्टुमहं लभे दशदिशास्तद्वक्त्रमुद्रांकिताः. अत्र श्यामामि
त्यत्र ज्योत्स्नीमिति शब्दो वाच्यः. तथा अविशेषपरिवृत्तस्यापि न्यूनपदे. यथा. कल्लोलवे
ल्लितदृषत्परुषप्रहारे रत्नान्यमूनि मकरालय मावमंस्थाः. किं कौस्तुभेन विहितो
भवतो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोपि. अत्र एकेन किं न विहितो भवतः स ना
मेति सामान्यं वाच्यं. अन्यथा विशेषस्य कौस्तुभेनोपकारित्वे सामान्येषु कथमादरः स्या
दिति. तथा साकांक्षस्यापि न्यूनपदे. अनुपात्तार्थकाकांक्षाविषयार्थकत्वं साकांक्षत्वं.
यथा. अर्थित्वे प्रकटीकृतेपि न फलप्राप्तिः प्रभोः प्रत्युतं द्रुह्यन् दाशरथिर्विरुद्धचरितो
युक्तस्तया कन्यया. उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च जगत्पति
र्दशमुखो देवः कथं मृष्यति. अत्र स्त्रीरत्नमित्युपेक्षितुमित्याकांक्षति. अन्यथा स्त्रीर
त्नमिति कथं मृष्यतीत्यनेनानन्वितं स्यात्. तथा हि. कथं मृष्यतीत्यस्य कथं न देहीत्य

र्थः स्यात् । मत्वधातोरद्देशार्थत्वात् । तथा च स्त्रीरत्नस्य द्वेषायोग्यत्वे कथं कथमित्यादिनान्व
यः । ततश्च साकांक्षस्य न्यूनपदत्वात् तद्भावः समुचितः । तथा अपरपुष्टस्यानुचितार्थः यथा
आशाशशिशिखामणि प्रणयिनी शास्त्रालि वक्षुर्न वन्नि क्रोर्मतपतौ पिनाकिनि परं लं के
तिदिव्यापुरी । इत्यत्र निर्दुष्टिगुणान्वयेन तदहो नेदृग्वरो न्यते स्याच्चेदेषनरावणः क्व नु पुनः
सर्वत्र सर्वे गुणाः । अत्र स्याच्चेदेषनरावण इत्येतावतैव समाप्यं । तथा हि । अत्र रावणोपमु
पक्षा वाक्यार्थः स्याच्चेदेषनरावण इत्येतेनैव प्राप्तः क्व नु पुनरित्यादिना समर्थनार्हतीत्यनु
चितार्थ । एवं एकसमभिव्याहारनिर्दिष्टोपमाधमरूपस्य सहत्वे अभिन्नस्यानुचितार्थ एवं
तद्भावः । यथा । अस्तेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा । निशा शशांकेन
धृतिः समाधिना नयेन चालं क्रियते नरेंद्रता । अत्र अस्ति बुद्ध्यादिभिरुत्कृष्टसहचरैर्व्यसन
॥३३॥ मूर्खतयोर्भिन्नत्वं इतीदमप्यनुचितार्थं । तथा प्रकाशितविरुद्धस्यानुचितार्थ एवं तद्भा ॥३३॥
वा वः । यथा । लग्नं रागावृतांग्या सुदृढमिह यथैवासियष्ट्यारिकंठे मातंगानामपीहोपरि परपुरुषैर्या
च दृष्टा पतंती । तत्सक्तोयं न किंचिद्गणयति विदितं तेस्तु तेनास्मि दत्ता भृत्येभ्यः श्रीनियो
गाद्गदितुमिव गतेत्यं बुधिर्यस्य कीर्तिः । अत्र विदितंते स्त्वित्यनेन वेदयित्व्यानुचितार्थाभि
धानेन क्रोधादिव्यक्तेः श्रीस्तस्मादपसरतीति विरुद्धप्रकाश्यते । इदमप्यनुचितार्थं । तथा हि

33

ध्यमुक्तस्य विधेयाविमर्शत्वं तदन्तर्भावः । यथा । वाताहारतया जगद्विषधरैराश्वस्य निःशेषितं ते
ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः । तेपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते । अत्र जगन्ति निःशेषयितुं वाताहारत्वमा
चरितमित्याद्यर्थे दम्भस्य स्फुरितमित्याद्यर्थान्तरन्याससस्वरसेन विवक्षणीये विधेयस्य व्युत्क्र
माभिधानेन विधेयायुक्तत्वं तथा च स्फुट एव विधेयाविमर्शे तदन्तर्भावः । तथा विधेयविरोधा
नुवादकरूपस्यानुवाद्यायुक्तस्याप्यनुचितार्थ एवान्तर्भावः । यथा । अरे रामाहस्ताभरण भ
सलश्रेणिशरणस्मरक्रीडाव्रीडाशमन विरहिप्राणदमन । सरोहंसोत्तंस प्रचलदलनीलोत्प
णः ल सखे सखे दोहं मोहं श्लथय कथय क्वेन्दुवदना । अत्र विरहिपुरूरवसो मोहश्लथने विधेये वि
रहिप्राणदमनत्वेनानुवादो नोचित इतीदमप्यनुचितार्थे । तथा । त्यक्तपुनःस्वीकृतस्य समा
प्तपुनरात्ते । त्यक्तोपसंहृतैकदेशः पुनःस्वीकृतः पुनःप्रकाशितैकदेशः । यथा । लग्नं रागावृ
ताङ्ग्येत्यत्र विदितं तेस्त्वित्यनेन यावतोर्थान्निवेद्यान् अनिवेद्यैव मध्येऽपसंहाराभिधाना
त् । तथा चात्र समाप्तपुनरात्तेनैव आवर्तितकं । यन्न मुधाप्याकांक्षत्वमेव दूषकताबीजमित्ये
तयोरभेदो न्याय्यः । अत्र पुंस्त्वपुंव्यंजकैर्न स्यादपि प्रतीतिरिदमप्यनुचितार्थं । नन्वेवमधिक
पदादीनामपि निरर्थकादिष्वन्तर्भावः स्यादिति चेत् । भवतु का नो हानिरिति । अथेदानीमेतद
युक्ततामन्तस्यानुचितार्थे । यथा । हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः । यथाशु जायते पातो न तथा पुनरुन्नतिः ।२

वाक्क्वचिददोषाइत्याह· कर्णावतंसादिपदे कर्णादि ध्वनिर्मितिः सन्निधानादि बोधार्थं· यथा
स्थास्याः कर्णावतंसेन जितं सर्वं विभूषणं· अत्रावतंसपदेन कर्णाभरणमुच्यते· तथापि क
र्णपदं नाधिकं· तथाहि· कर्णपदेन कर्णस्थितस्य अवस्था प्रतिपाद्यते· तेन वर्णनीयोत्कर्षः प्रती
यते स्वतो न भूषणान्तरजेत्वमपि तु तत्कर्णसंबंधेनेति पर्यवसानात्· तथा श्रवणकुंड उत्त
शिरःशेखरधनुर्ज्यामुक्ताहारपुष्पमालाशब्देषु श्रवणादिशब्दास्तत्तद्विशेषज्ञानाय बोधार्थाः
स्थितेयेन तत्समर्थनं· न खलु कर्णावतंसादिपदवत् जघनकांचीत्यादि क्रियते· ख्यातेर्थे नि
र्हेतोरदुष्टता· यथा· चंद्रं गता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां· उमामुखं तु प्रति
पद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः· अत्र रात्रौ पद्मस्य संकोचो दिवा चंद्रस्य निःप्रभ
त्वं लोकप्रसिद्ध इति न भुंक्त इति हेतुर्नापेक्षते· अनुकरणे तु सर्वेषां· सर्वेषां श्रुतिकटुप्र
भृतीनां दोषाणां· यथा· मृगचक्षुषमद्राक्षमित्यादि कथयत्ययं· पश्यैष च गवित्याह सूत्रा
माणं यजेतेति च· वक्राद्यौचित्यवशाद्दोषोपि गुणः क्वचिन्नोभौ· वैयाकरणे वक्तरि प्रतिपाद्ये
च रसे च रौद्रादौ कष्टत्वं गुणः· क्रमेणोदाहरणं· दीधीङ्· वेवीङ्· समः कश्चिद्गुणवृद्ध्योर
भाजनं· क्विप्रत्ययसमः कश्चिदत्र संनिहितेन ते· अत्र वैयाकरणो वक्ता तेनातिशाये
न वैयाकरणप्रतीतेर्गुणत्वं· यदा त्वामहमद्राक्षं पदविद्याविशारदं· उपाध्यायं तदा

॥३४॥

स्मार्थेस्य समस्याक्षं वसंपदं । अत्र वैयाकरणे प्रतिपाद्यैकदृष्टत्वं गुणः । तेन तस्य प्रीत्यतिशयात् । गौ
डाद्यो चि विवशाद्यथा प्रागुदाहृतेष्व द्रुमुहृतहृत्तेत्यादौ उत्स्लोत्ल्पोल्लेत्येत्यादौ वउत्कटा वर्णगुम्फो
जयेतः । प्रकृतवीरविमत्सरयोर्गुणगुणमादधाते । वाच्यौचित्यवशाद्यथा । गर्जद्घनघटाघटोपेहरोद्धुं
कारकारिणि । किमन्येपि चटुवेताः सीदन्ति रदन्तिनः । अत्र सिंहवाच्ये परुषा वर्णा गुणाः । प्रकरणवशा
द्यथा । रताशोकदशोदरीक्षणगुणा तान्यस्मानुरक्तजनेनो दृष्टेति प्रधैवचालयति किं बालानि धूतं शिरः ।
इत्यंकठाघटमानषट्पदघटासंघट्टदष्टदरस्तस्याहृतिमन्तरेण भवतः । शृङ्गारमोपघ्नतः । अत्र शि
रोधूनने न कुपितस्यैव चलितविप्रलम्भे निगुणाः । क्वचिन्नीरसे कष्टत्वेन गुणत्वेन दोषः । शृङ्गारवीरादिर
सानामेकस्याप्यभावान्नापकर्षकत्वं चोत्कर्षकत्वं च । यथा । तरुणिम्नि स्थिते कृतदेवकार्ये मर्त्योपमर्त्योत्तरत्नम्य
एव । अत्र वक्तृप्रत्ययमन्तरेण छौबीजांकुरः प्रागुदयादिवाभः । अत्र प्रयुक्तनिहतार्थाभ्यो पादो न दुष्टो भ
रूपालंकारहेतवकत्वनिर्वाहकत्वात् । प्रतीतिमात्रपर्यवसायित्वात् । यथा । येन ध्वस्तमनोभवेन ब
लिजित्कायः पुरास्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च योऽधारयत् । यस्याहुः शशिमच्छिरो ह
र इति स्तुत्यं च नामामराः पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः । अत्र माधवपक्षे शशि
मद्धकक्षयकरशब्दाव प्रयुक्तनिहतार्थौ अश्लीलं क्वचिद्गुणः । यथा सुरतारम्भगोष्ठ्यां त्र्यर्थैः प
दैः पिशुनयेद्रहस्यवस्तु इति कामशास्त्रस्थितौ । करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते उपस

नवापिव

35

॥३५॥

र्यन्तध्वजः पुंसः साधनांतर्विराजते। शमनकथास्यथा। उत्तानोच्छूनमंडूकपाटितोदरसन्निभे। क्लेदि
नि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते। अत्र वैराग्यहेतुघृणात्वादनेयार्जुगुप्सा गुणः। निर्वाणवैरदह
नाः प्रशमादरीणां नंदंतु पांडुतनयाः सहमाधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवंतु
कुरुराजसुताः सभृत्याः। अत्रेदुर्योधनामंगलस्य नायकमंगलत्वेन गुणत्वं। संदिग्धमपि क्वचिद्गुणः।
यथा। कुशोज्जनं महाराज मम मापिवेत्यादौ। अत्र राज्ञो महिमा वर्णनीय इति नियतार्थप्रतिपादकत्वे
न सुन्दत्वं व्याजस्तुतिपर्यवसायित्वात्। एवं सामाजिकस्य सत्वे सत्य प्रतीतं न दोषः। तथैतरशक्तस्व
शानोत्कर्षधारागुणश्च। अधम प्रकृतेर्विदूषकादेरुक्तिषु ग्राम्यो ऽपि गुणः। एतदुपंस्वय
गुणतायं। न्यून पदं क्वचिद्गुणः। यथा। गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सान्द्रस्नेहरसा
तिरेकविगलच्छ्रीमन्नितंबांबरा। मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी सुप्ता किं
नु मृता नु किं मनसि मे लीना विलीना नु किं। अत्र पीडयेति पदमनुपात्तं वक्त्र्या हर्षमोहातिशयं
प्रतिपादयत्गुणतामापाद्यते। अत्रा ध्याहारेण वाक्यार्थबोधविलंबेपि प्रकृत रसपोषक
त्वात्। उक्तोरूपासमसमनः सितः सुप्ता किं निश्चलत्वेन वर्तमानत्वात्। नु मृतस्थास्यासादिकमनुभूय
तदुत्पत आह। मृता नु किमिति। मृतापि बहिरनुभूयते इत्यत आह। लीनेति। जतुकाष्ठवदिति
शेषः। तथा न्त तस्यापि केनचित्प्रकारेण विघटनं कर्तुं शक्यत इत्यत आह। विलीना नु किमिति।

॥३५॥

नीरक्षीरवदिति शेषः । क्वचिन्न गुणो न दोषः । यथा । तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्य
ती त्यादौ पिहितेत्यनन्तरं नैतद्यतद् इत्येतेन्यैःपदैर्विशेषबुद्धेरकरणान्न गुणः । उन्नता प्रतिपत्तिः पु
र्वं प्रतिपत्तिं बाधत इति न दोषः । यथा । वदवदजितः शत्रुर्न हतो जल्पंश्च तवं वास्मीति । चित्रं चित्रं
मरोदीद्धा हहेति परं मन्ते पुत्रे । इत्येवमादौ हर्षभयादियुक्तैव वक्त्रे रिह हर्षादिद्योतकत्वात् । केचित्केषि
तपदं गुणः । लाटानुप्रासेऽर्थान्तरसंक्रमितवाच्ये विहितस्यानुवाद्ये च । क्रमेणोदाहरणं । यस्य
न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य । यस्य च सविधे दयिता दवदहनस्तुहिनदी
धितिस्तस्य । यस्य मित्राणि मित्राणीत्यादौ । जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवा
प्यते । गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ॥ इति त्रिषु लाटानुप्रासादित्रयसं
पादकत्वात् । यत्तत्प्रकर्षे क्वचिद्गुणः । यथा । प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाविधाविर्भवत्क्रो
धप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् । उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठ
पीठातिथिर्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥ अत्र चतुर्थपादे गुणोः स्मरणेन क्रो
धाभावान्मसृणवर्णत्वमेवोचितमिति तस्यादौ पत्वे । विनयप्रकाशकत्वात्तु गुणत्वं । समान
पुनरात्तं क्वचिन्न गुणो न दोषः । यत्र न विशेषणदानार्थं पुनर्ग्रहणं अपितु वाक्यान्तरमेव
क्रियते । यथा तवैव प्रागप्राप्ते त्यादौ । अत्रायमभिप्रायः । विशेषणस्य विशेष्यसाकांक्षतया क्रि

व्यभिचारादीनां स्वशब्देनोपादाने भावध्वनित्वं वा सत्कारित्वं रसत्वं न तु स्यात्. व्यंजितानामेव ॥१७

~~स्म सा कांक्षास्य~~ विशेष्यपदाहृतिनैयत्येन तद्विलंबेन विलंबः. वाक्यंतरारंभेपुनरंगांगिभावे नाकांक्षा
वैगुण्यं निरस्तं तद्दोषः. अपदस्य समासे क्वचिद्गुणः. यथोदाहृते रक्ताशोक कृते त्यादौ. नोदृष्टेति क्रोधो क्रौ
दीर्घसमासाकरणात्स्थानौचित्यविवेचनाभावेन क्रोधोन्माद परिपुष्टिः. शृंगारे दीर्घसमासानौचित्या
दस्थाने समासतेति भास्करस्तथावतस्य क्रोधपोषकत्वगुणमिति. एवमन्योपि लक्ष्यालक्ष्यं.
अथ रसदोषानाह. व्यभिचारिरसस्थायिभावानां शब्दवाच्यता. कष्टकल्पनया व्यक्तिरनुभा
वविभावयोः. प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः. अकांडे प्रथनच्छेदावंगस्याप्यतिवि
स्तृतिः. अंगिनोननुसंधानं प्रकृतीनां विपर्ययः. अनंगस्याभिधानं च रसे दोषास्तु सीदृशाः.
व्यभिचार्यादीनां तत्तन्नामरूपत्वात्. अतएवोक्तं व्यभिचारी तथांजित इति. तथाभिव्यक्तस्य चम
त्कारकारी शृंगारादिकोऽरस इति. एवं व्यक्तः स तैर्विभावाद्यैरित्यादि. एवं सत्येतेषां प्रधानकी
र्त्यत्वे भवति. एतत्सर्वं व्यंजनावृत्तेर्माहात्म्यं. तत्र प्रमाणं तु सहृदयहृदयमेव. व्यभिचारिणः स्व
शब्देनोपादानं यथा. सव्रीडा दयितानने न करुणामातंगचर्मांबरे सत्रासा भुजगे सविस्मयरसा
चंद्रेमृतस्यंदिनि. सेर्ष्या जह्नुसुतावलोकविधौ दीना कपालोदरे पार्वत्या नवसंगमप्रणयिनी
दृष्टिः शिवायास्तु वः. अत्र व्रीडादीनां. ध्यानमदयितानने मुकुलितामातंगचर्मांबरे सोत्कंपा भु
जगे निमेषरहिता चंद्रेमृतस्यंदिनी. मीलद्भ्रूः सुरसिंधुदर्शनविधौ म्लाना कपालोदरे इत्यादि

३६

॥३६॥

॥३६॥

ॐ एवं कृते व्रीडादीनामनुभावव्यंग्यत्वसिद्धेः॥ एवं रसस्य स्वशब्देन वाच्यत्वं॥ यथा॥ तामनंगजय
मंगलश्रियं किंचिदुच्चभुजमूललोकितां। नेत्रयोः कृतवतोस्य गोचरे कोप्यजायत रसो निरंतरः॥ ए
वं शृंगारादिशब्देन वाच्यत्वेपि बोध्यं॥ एवं स्थायिनोपि॥ यथा॥ संप्रहारे प्रहरणैः प्रहाराणां परस्परं॥
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत्॥ अत्रोत्साहस्य॥ कष्टकल्पनयेति॥ कर्पूरधूलिधवल
द्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः॥ लीलाशिरोंशुकनिवेशविशेषक्लृप्ति व्यक्तस्त
नोन्नतिरभूल्लवयौवनासौ॥ अत्रानुभावस्य कष्टकल्पना॥ विभावस्य यथा॥ परिहरति रतिं मतिं लुनी
ते स्खलतितरां परिवर्तते च भूयः॥ इति तव विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः॥ अत्र का
मिनीरूपो विभावोपलप्तिपाद्यः॥ कष्टकल्पनया विभावादेरभिव्यक्तौ स्फुटमेवति दूषकताबी
जं॥ प्रतिकूलविभावादिग्रह इति॥ यथा शृंगारादिकं प्रतिकूलस्य शांतस्य विभावादेः पा
दानं समूलमुन्मूलयति तदेव दूषकताबीजं॥ यथा॥ त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं च
तुरं वयः॥ परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः॥ दीप्तिः पुनः पुनरिति॥ छिद्यविच्छि
द्य ग्रहणं॥ तेषां तत्संबंधेन रसस्याविच्छेदो भवतीति तदेव दूषकताबीजं॥ यथा कुमारसंभवे रतिवि
लापे॥ अकांडे प्रथनं॥ यथा वेणीसंहारे बहूनां संक्षये वर्तमाने भानुमत्या सह दुर्योधनस्य शृंगारव
र्णने॥ अकांडे छेदो यथा वीरचरिते रामजामदग्न्ययोर्धारावाहिनि वीररसे कंकणमोचनाय गमनासी
ति रामस्योक्तौ अंगस्याप्यप्रधानस्यातिविस्तरेण वर्णनं॥ यथा हयग्रीववधे हयग्रीवस्य॥ अंगि

पति

च

ऽग्नि। ननु संधानं यथा ... वल्यां वा मन्यामा मने सा नारिकाय विस्मृतिः। प्रकृतयो दिव्या अदिव्या
दिव्यादिव्याश्च। धीरोदात्तधीरोद्धतधीरललितधीरशान्ता उत्तममाधममध्यमाश्च। तेषां लोकशास्त्रा
दिक्रमेणान्यथा वर्णनं विपर्ययः। अनङ्गस्य रसस्यानुपकारकस्य। यथा कर्पूरमञ्जर्यां नायिक
यात्मना [illegible] वसन्तवर्णन मनाहृत्य वन्दिवर्णितस्य राज्ञः प्रशंसनं। ईदृशा इति नायिकापादप्रहारा
दि नानायककोपादिवर्णनं [illegible] हि। अनौचित्यादृते नान्यद्रसभङ्गस्य कारणं। प्रसिद्धौचित्य
बन्धस्तु रसस्योपनिषत्परा। इति। इदानीं यथासंभवं क्वचिद्दोषा इत्याह। न दोषः स्वपदेनोक्तावपि
संचारिणः क्वचित्। यथा। प्रातः पुनः स्याद्दुहि [illegible] मनाततस्यं इत्युत्सुकत्व
[illegible] अत्रौत्सुक्यशब्द इव तदनुभावो न तथा प्रतीतिकृ
दिति स्वशब्देनोपादानं। यथा वा। दूरादुत्सुकमागते विवलितमित्यादौ। औत्सुक्येन कृतत्वरा इत्या
दौ च। तदनुभावस्य सहसा प्रसरणादिरूपस्य स्वशब्दस्येव तस्य झटिति प्रत्यायकत्वं। संचार्या
दे विरुद्धस्य बाध्यस्योक्तिर्गुणावहा। बाध्यत्वेनोक्तिर्न परं न दोषो यावत्प्रकृतरसपरिपोष
कृते। यथा। क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषाणां प्रशमाय नः श्रुत
महो कोपेऽपि कान्तं मुखं। किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्य
मुपैहि कः खलु युवा धन्योऽधरं धास्यति। इत्यादौ वितर्कमतिशङ्काधृतीनां शान्तसंचारिणां

॥३७॥

ष्टंगारपरिपंथिनामपि बाध्यत्वेनोक्तेः शत्रुविजयपूर्वकराज्यलाभवत् प्रकर्षविधा-
यकत्वेन तत्परिपोषकता। नानुपमर्द्य चिंतायामेव विश्रांतेः तेनात्र प्रतिकूलविभा-
वादिग्रहे न दोषः संचार्यादेरित्यादिग्रहणाद्विरुद्धस्य विभावादेरपि बाध्यत्वेनोक्तौ गुणा-
वहत्वं। यथा। सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः। किं तु मत्तांगनापांगभंगलोलं हि जी-
वितं। अत्र शृंगारविभावस्य शांतविभावस्य जीवितास्थैर्यरूपस्य च परस्परं विरुद्धत्वेपि शृं-
गारविभावस्य बाध्यत्वेनाभिधानान्न दोषत्वं अपि तु गुणत्वं शांतस्य परिपोषकत्वात्। तस्
र्वारामादयः सत्ये वै जीविते तद्दर्शनमुपादेयाः जीवितं चातिभंगुरमिति किं हेतमुपादेयत्वमे-
तेषामेतादृशत्वेपि निःफलत्वादेवेति पर्यवसानात्। आश्रयैक्ये विरुद्धो यः स कार्यो भिन्न-
संश्रयः। रसांतरेणांतरितो नैरंतर्येण यो रसः। वीरभयानकयोरेकाश्रयत्वेन विरोध इति
प्रतिपक्षगतत्वेनाभयानको निबद्धव्यः। रस्यमानो विरुद्धो यः साम्येनाथ विवक्षितः। अंगिन्यंग-
त्वमाप्तौ यौ तौ न दुष्टौ परस्परं। यथा अयं स रसनोत्कर्षी स्यैव पूर्वावस्थास्मरणे पोषयति। साम्ये-
नेति। यथा। सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया। मुहुर्मुहुर्दशनवि-
लंघिततोष्ठया रुषान्धया नृपाः प्रियतमयेव भेजिरे। इत्यत्र शृंगाररौद्रयोः साम्यविवक्षणान्न दोषत्वं। अं-
शांतशृंगारयोर्नैरंतर्ये विरोध इति रसांतरमंतरे कार्यं यथा नागानंदे शांतस्य जीमूतवाहनस्य अ

णान्वयांगत्वमिति. यथा. क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंऽशुकांतं गृह्णन्केशेष्वपा
स्तश्चरणनिपतितो नेक्षितः संभ्रमेण. आलिंगन्योवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः. इत्यत्र त्रिपुररिपुप्रभावातिशयस्य क
रुणांगं तस्य तु शृंगारः तथापि न करुणा विश्रांतिरिति तस्यांगत्वेव. तथा च प्राग्यथा कामुकआ
चरितवान्नत्वायशराग्निरिति शृंगारपरितोषितेकरुणेन तु रस्य एवार्थउपोद्बल्यते.॥ ॥छ॥

७६ ॥ ॥छ॥ ॥इति संक्षेपकाव्यप्रकाशे दोषनिरूपणं नामस[illegible]तीयउल्लासः॥ ॥छ॥ ॥ एवं दोषा
नुक्त्वा गुणालंकारयोर्विशेषमाह. ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतव
स्ते स्युरचलस्थितयो गुणाः. गुणानां वर्णगतत्वं निरस्यति. रसस्येति. तत्र दृष्टांतमाह. आत्मन
इवेति. यथा आत्मन एव शौर्यादयो गुणाः नाकारस्य तथा रसस्यैव माधुर्यादयो गुणा न वर्णानां
समुचितैर्वर्णैर्व्यज्यंत इति व्यंजकव्यंग्यभावसंबंधेन वर्णगतत्वेन व्यवह्रियंते. उत्कर्षहेतव इ
॥३८॥ ति. उत्कर्षश्च रत्याद्यवच्छिन्नस्य चैतन्यस्य आनंदांशे आवरणस्य सम्यगुच्छेदः चमत्कारवि ॥३८॥
शेषो वा. अचलस्थितय इति. नियतस्थितय इत्यर्थः. नैयत्यं च रसे न तदुपकारेण च. ते गुणा रसं
विना नावतिष्ठंते. अथ च स्थिता अवश्यं रसमुपकुर्वंतीत्यर्थः. एतदुभये अन्वयव्यतिरेको लंकार
नि गुणालंकारयोर्विभाग इत्येवदृर्शयन्नाह. उपकुर्वंति तं संतं येंगद्वारेण जातुचित्. हारादिव द

शरी

लंकारास्तेनुप्रासोपमादयः॥ ये वाच्यवाचकलक्षणांगातिशयेन तं मुख्यं रसं संतं संभविनमु
पकुर्वंति ते कंठाद्यंगानामुत्कर्षाधानद्वारेण शरिणोपुपकारकाहारादयइवालंकाराः। यत्र नास्ति र
सस्तत्रोक्तिमात्रवैचित्र्यपर्यवसायिनः। क्वचित् संतमपि नोपकुर्वंति। यथा। अपसारय घनसा
रं कुरु हारं दूर एव किं कमलैः। अलमलमालि मृणालैरिति वदति दिवानिशं बाला। काद्यत्रादावनु
प्रासेन शब्दानामलंकरणद्वारा रस उपक्रियते। तथा। मनोरागस्तीव्रं विषमिव विसर्पत्यविर
तं प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव। हिनस्ति प्रत्यंगं ज्वर इव गरीयानितइतो न मां त्रा
तुं तातः प्रभवति न चांबा न भवती। अत्र वाच्यमुखेन मालोपमया प्रतीतविषादिधर्मप्रत्याय्य
विप्रलंभ उत्कृष्यते। उक्तिवैचित्र्यमात्रपर्यवसिता इति। उक्तिवैचित्र्यं शब्दानां स्वरूपवलंब
धकौशलमर्थानामीषन्मनोहारित्वं स्वयमेवोदाहार्यं। संतमपीति। यथा। चित्ते विहट्टदि ण
टुट्टदि सा गुणेसु सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं। बोलम्मि वट्टदि पअट्टदि कव्वबंधे झा
णे ण तुट्टदि चिरं तरुणी तरट्टी। अयमा मम सर्वत्रानुपयुज्यत इत्यत्र तात्पर्यं। अत एव तरट्टी ज्ञा
नख्याता। इदं विरहिणो नायकस्य वचनं। अत्र संतमेव रसं नोपकरोति। अनुजोविजकस्य प
रुषानुप्रासस्य विप्रलंभानुकूलत्वात्। प्रकृतस्योपमागुणप्रधानत्वात् तदनुकूलत्वेना
दोषत्वात्। तथा। मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति क्रंदत्सु भ्रमरेषु वीक्ष्य दयितां

सन्तं पुरः सा ... चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता वक्त्रे केवलमर्गी
ले वा निहिता जीवस्य निर्गच्छतः । अत्र विप्रलंभे [illegible] पत्वेन स्मृ
ति बंधवर्णने संनमपि विप्रलंभमुपमानोपकरोति एवमेव गुणालंकारविवेकः । इदानीं गु
णानां भेदानाह । माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश । आह्लादकत्वं माधुर्यं शृंगा
रे द्रुतिकारणं । शृंगारे अर्थात्संभोगे । द्रुतिर्गलितत्वं । इह हि सामाजिकानां चित्तेषु नवरसा
स्वादावस्थायां द्रुतिविस्तारविकासक्षोभ । तत्र शृंगारकरुणशांतेभ्यो द्रुतिः वीरबीभ
त्सरौद्रेभ्यो विस्तारः । हास्याद्भुतभयानकेभ्यो विकाशः । यन हास्ये वदनविकाशः । भयानके
द्रुतापसरणमिति । करुणे विप्रलंभे तच्छांते चातिशयान्वितं । अत्यंतद्रुतिहेतुत्वात् । दीप्त्या
त्मविस्तृतेर्हेतुरोजो वीररसस्थितिः । चित्तस्य विस्ताररूपदीप्तिहेतुरोजः । बीभत्सरौद्रर
सयोस्तस्याधिक्यं क्रमेण तु । वीराद्बीभत्से ततोपि रौद्रे सातिशयमोजः । एवं हास्यशृंगारा
णतया माधुर्यं प्रकृष्टं विकाशधर्मतया ओजोपि प्रकृष्टं । एवमद्भुते प्योजः । माधुर्यस्याप्या
ह्लादकत्वरूपतया । भयानके ष्वेवमेव माधुर्यमप्रचित्तद्रुतिस्वभावत्वेपि विभाव
स्य दीप्तरसतया ओजः प्रकृष्टं च । शुष्केंधनाग्निवत्स्वच्छ[illegible]जलवत्सहसैव यः । व्याप्नोत्य
न्यत्प्रसादोसौ सर्वत्र विहितस्थितिः । अन्यदिति । व्याप्यमिह चित्तं । पदावीररसादिषु

।।३९।।

39

स्थितं व्याख्यातोनि तदा गुणेषु धनाभिवदिति यदा शृंगारकरुणादिषु तदा स्वच्छजलवदिति ।
सर्वत्रेति । सर्वेषु रसेषु सर्वासु रचनासु । स्फुटिति प्रतीयमानत्वं रसेषु । स्फुटिति प्रत्यायकत्वं र
चनादिषु । गुणवत्त्वात् पुनस्तेषां वृत्तिः शब्दार्थयोर्मता । गुणवत्त्वात् उपचारेण । व्यंजकत्वेन तद्
वत्त्वमुपचर्यत इत्यर्थः । दशेति । परोक्ताः । तदुक्तं । श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थ
व्यक्तिरुदारत्वमोजः कांतिसमाधयः । इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः । तत्र श्लेषा
दीन्क्रमेणाह । बहूनां पदानामेकवद्भासनं श्लेषः । संधिसौष्टवादेकस्थानीयवर्णविन्यासा
त् । तदुक्तं । श्लिष्टमस्पृष्टशैथिल्यमिति । यथा । अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम
नगाधिराज इत्यादौ । श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् । साधारणः समग्राणां स प्रसा
दो गुणः स्मृतः । समग्राणां घटनादीनां । यथा । असकलनयनावलोकितेन स्फुटपरिलसमनोह
रैर्वचोभिः । कमलमुखि मुरारेरेवमेवं कथयति कियंति दिनानि निर्वचनीयः । समता मार्गाभेदः । य
थाशीघ्रोपक्रमस्तथैव रीत्या समापनं । यथा । अनंगरंगप्रतिमं तदंगं भंगीभिरंगीकृतमानताङ्ग्याः
कुर्वंति यूनां सहसा यथैताः स्वांतानि शांतापरचिंतनानि । पृथक्पदत्वं माधुर्यं । सुमनस्त्वं च ।
यथा । वेद स्वतो मनुर्नामेत्यादि । सुकुमारता अपरुषतरवर्णशालित्वं । यथा । अपसारय घनसा
रमित्यादौ । अर्थव्यक्तिः स्फुटितार्थसमर्पणं । अन्यार्थपदवाक्यार्थ उक्तः । तेन प्रसादभेदः । यथा ।

प्रकलेत्यादि। यथा वा। वैरस्वानसैः परिवृतेषु वनेषु वासस्तो तान्न यातस्त्वया जननि नत्रत
वानुरोधः प्राणाधिकस्य भरतस्य च राज्यलोभो रामेणाद्य विक्रमितः परमर्जितव्यः। उदारता नि
कटत्वरूपा। विकटत्वं च वर्णानां विच्छेदान्नृत्यत्प्रायत्वं। यथा। स्वचरणविनिविष्टैर्नूपुरैर्न
र्तकीनां झणिति रणितमासीत्तत्र चित्रं कलं च। ओजो गाढबंधत्वं। यथा। मूर्ध्नामुद्वृत्तकृत्तेत्यादि
कांतिरोज्वलत्वं। हालिकादिसाधारणपदविन्यासवैपरीत्येनालौकिकशोभाशालित्वं। य
था। कलक्वणितगर्भेण कंठेनाघूर्णितेक्षणः। पारापतः परिभ्रम्य रिरंसुश्चुंबति प्रियां। आ
रोहावरोहक्रमरूपः समाधिः। आरोहो गाढता। अवरोहः शैथिल्यं। तयोः क्रमेण तन्निबंधनं। यथा
चंचद्भुजभ्रमितचंडगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानावनद्धघनशोणि
तशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः। अत्र संचूर्णितांते आरोहः। सुयोधनांते अ
वरोहः। पुनस्तवांते पूर्वः। भीमइत्यंते परः। न पुनर्दशेति। एतेष्वश्लेषादयो न गुणाः। गुणा हि र
सधर्माः। एतेषां तु शब्दधर्मत्वात्कथं गुणत्वं। वस्तुतस्तु गुणा रसधर्माद्यत्र प्रमाणानां
त्वं न च तथा सति गुणालंकारयोर्विभागानुपपत्तिरिति वाच्यं। काव्यशोभायाः कर्तारो ध
र्मा गुणास्तदतिशयहेतवस्त्वलंकारा इति विभागोपपत्तेः। तथा अर्थगुणा अपि स्वीकार्याः।
तथा हि। क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्माश्लेषः। अस्यार्थः क्रमः क्रि
एते शब्दगुणाः स्वीकार्या एव। रसोत्कर्षकत्वात्॥

या परंपरा· विघ्नचेष्टितं कौटिल्यं· अस्पष्टत्वमनुल्बणत्वं· उपपादयितुं केलिरूपपत्तिः
एषां योगः स एव रूपं यस्या घटनायाः यस्याः रचनायाः स श्लेषः· यथा· दृष्ट्वैकासनसंस्थि
ते प्रियतमे पश्चादुपेत्यादरादेकस्या नयने पिधाय विहितक्रीडानुबंधछलः· ईषद्वक्रि
तकंधरः सपुलकः प्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुंबति· ए
वं प्रसादोऽर्थवैमल्यं यावदर्थपदता· यथा· कांचीपदं न तु कांचीगुणस्थानमित्यत्र· अ
नुगुणपदस्याधिक्याभावः· वैषम्याभावः समता प्रक्रमाभेदः· यथा· उदेति सवितेत्यादौ·
माधुर्यमुक्तिवैचित्र्यं· एकस्यैवार्थस्यान्यतरेण कथनं· तदेव नवीकृतत्वं गुणः· यथा·
यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः· लवणमंबु सदैव महोदधेः प्र
कृतिरेव सतामविषादिता· इत्यादौ स्वाभाविकत्वादिदं नाद्भुतं· एवं किं तत इति सदैवेत्येतयो
रपि· अत्र स्वाभाविकत्वस्य धर्मस्यैकस्य भंग्यंतरेण कथनान्नवीकृतत्वं· सुकुमारता अपारुष्य
अकांडे शोकदायितानाभावः· यथा मृते यशःशेष इति· सारस्वता विहता नवका विलसंति व
चरति नो कंकः· सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये· तथा वस्तुस्वभावस्फुटत्वम
र्थव्यक्तिः· वस्तुनः स्वभावस्य स्फुटत्वं वर्णनया व्यक्तीकरणं यत्र· रसाभिव्यक्तिहेतुत्वं वारूढो
यथा ध्यान्येन परं भवति सगुणः· यथो दाहृते पारापतः· परिभ्रम्य हिरस्तुकुञ्जं बतिभिर्यामि

॥८४॥

त्यादौ। स्वभावोक्तिस्त्वलंकारकृतचारुत्वाय पर्यवसीतीति ततोऽस्य भेदः। उदारत्वं वाचि वैदग्धी।
यथा। कामं कंदर्पचांडालो मयि वामाक्षि निर्दयः। त्वयि निर्मत्सरो दिष्ट्येत्यत्र। पदार्थो वाक्यर-
चनं वाक्यार्थस्तु पदाभिधा। प्रौढिर्व्याससमासौ च युक्तिः क्रमेणोदाहरणं। चंद्र इत्येकपदार्थे
अत्रिनयनसमुत्थं ज्योतिरिति। द्वितीये यथा। कोनाथिनी लेयायाति संकेतं साभिसारिकेति
बहुपदार्थेषु अभिसारिकापदाभिधाने। तथा एकवाक्यार्थस्यानेकवाक्येन प्रतिपादनं
व्यासः। अनेकवाक्यार्थस्य एकपदेन प्रतिपादनं समासः। क्रमेणोदाहरणं। प्राग्प्राप्तःश्रियः सक
लकामदुघास्ततः किमित्यादि। अत्र तत्त्वज्ञानादन्यत्सर्वं न किंचित्करमित्येकवाक्यार्थोऽनेक
वाक्येन प्रपंचितः। द्वितीयो यथा। पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे। इतरेषु च पांचाल्याः त्रि
तयं त्रितयं त्रिषु। अत्र एकवाक्ये बहुवाक्यार्थनिबंधात्समासः। अथ कांतिर्दीप्तरसत्वरूपा।
यत्र रसोद्दीपनेऽकृतत्वे चारुत्वं नालंकारादिसंभिन्ने। यथा। यः कौमारहरः स इत्यादौ। तथा
र्थदृष्टिरूपः सामान्यः। अर्थश्च द्विविधः। अयोनिरन्यच्छायायोनिश्चेति। क्रमेणोदाहरणं। सद्यो मु
ण्डितमत्तहूणचिबुकप्रस्पर्धि नारंगकमित्यत्र। एवं नारंगकवर्णनमन्येन न कृतमित्ययोनिः।
द्वितीयो यथा। निजनयनप्रतिबिंबैरंबुनि बहुशः प्रतारिता कापि। नीलोत्पलेऽपि विमृश
ति करमर्पयितुं कुसुमलावी। अत्र नयनोत्पलयोः सादृश्यमन्येनापि वर्णितमित्यन्यच्छा

॥८४॥

याक्योनिः इत्यास्वादोत्कर्षहेतूनां गुणानामपलापः कर्तुमयोग्यः एतदुपपादनामिति· अपिचे
यदुक्तं· केचिदंतर्भवंत्येभिरिति· तदचारु· शब्दार्थधर्माणां गुणानां रसधर्मेषु माधुर्यादिष्वंतर्भाव
स्याग
स्यान्याय्यत्वात्· यदपि च दोषत्यागेनाभिता इत्यनेन गुणा दोषाभावा एवेत्युक्तं· तदपि तुच्छं· दोषा एव
गुणाभावाः संति तस्यापि स्तुवचनत्वात्· तथा च विनिगमनाविरहान्नापि पृथक्· यदप्यगुणो
अन्ये मन्यंते दोषत्वं कुत्रचिदिति· तदपि कुत्रचित् श्लोकौचित्यवशाद्दोषाणामन्यथात्वमभ्युपे
तमेव· अथ रसधर्माणां माधुर्यौजःप्रसादानां गुणानां के व्यंजका इत्याह· मूर्ध्नि वर्गांत्यगाः स्प
र्शा अटवर्गा रणौ लघू· अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा· टठडढवर्जाः कादयो मां
ताः शिरसि निजवर्गांत्ययुक्तास्तथा रणौ ह्रस्वांतरितौ वितिवर्णाः· अवृत्तिः समासाभावः मध्य
मः समासो वेति समासः तथा माधुर्यवती पदांतरयोगेन रचना माधुर्यस्य व्यंजिका इति शेषः· प
दांतरयोगादिति· यथा· लंकुर्वित्यत्र पादयोः· संधौ मधुरवर्णत्वमिति· यथा· अनंगरंगप्रतिमं तद
गमित्यादि· योगः आद्यतृतीयाभ्यां द्वितीयचतुर्थयोर्योगः· रेफेण अधः उपरि उभयत्र वा· यस्य
कस्यचित्· ययोः स्तेन तस्यैव संबंधः· टवर्गौ थौ ह्रकारवर्जाः· शकारषकारौ दीर्घसमासो
विकटा घटना ओजो व्यंजका इति शेषः· यथा· मूर्ध्नामुद्वृत्तकृत्तेत्यादि· प्रसादव्यंजकमाह· श्रु
तिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत्· साधारणः समग्राणां स प्रसादो गुणः स्मृतः· सम
प्राणसंघटनादीनां श्रुतमात्रा वर्णादयोऽर्थप्रतीतिहेतवो भवंतः प्रसादव्यंजका इति भावः·
×मंत्ययोरणत्वं· ययोः· तादिः शषौ वृत्तिर्दैर्घ्यं गुंफ उद्धत ३० जसि· वर्गप्रथमतृतीयाभ्यां ×५

यथा॰ अन्यं वा सगदहसि त्यादौ॰ यद्यपि गुणपरतंत्रा घटनादयस्तथास्तथापि॰ वक्तृवाच्य
प्रबंधानामौचित्येन क्वचित्क्वचित्॰ रचनावृत्तिवर्णानामन्यथात्वमपीष्यते॰ क्वचिद्वाच्यप्रबंधा
नपेक्षया वक्त्रौचित्यादेव रचनादयः क्वचित्प्रबंधानपेक्षया वाच्यौचित्याद्रचनादयः उदा
हरणं तु स्वयमूहनीयं॰ एवं क्वचिद्वक्तृवाच्यानपेक्षया प्रबंधौचित्यात्प्रवर्तन्ते यथा॰ आख्यायि
कायां शृंगारेपि न मसृणवर्णादयः कथायां रौद्रेपि नात्यंतमुद्धताः॰ एवमन्यदप्यौचित्यमनुस
र्तव्यं॰ ॥ ॥ छ ॥ ॥ इति गुणनिर्णयो नाम चतुर्थ उच्छ्वासः॰ ॥ ॥ छ ॥ ॥ अथालंकारानाह॰ तत्र का
व्यलक्षणे शोभस्यप्रागुपादानात् शब्दालंकारानाह॰ यदुक्तमन्यथा वाक्यमन्यथान्ये
न योज्यते॰ श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॰ तथा श्लेषवक्रोक्तिः काकुवक्रोक्ति
श्च॰ उदाहरणं॰ अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता॰ त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी
क्वचित्॰ काक्वा यथा॰ गुरुजनपरतंत्रतया नितरां दूरतरं देशमुद्यतो गंतुं॰ अलिकुलकोकिलललि
ते नैष्यति सखि सुरभिसमयेसौ॰ नायिकया नैष्यतीति निषिद्धं तत्सखी काक्वान्यथा योजित॰
नैष्यति एष्यत्येवेत्यर्थः॰ अन्येनेति विवक्षणात्स्वोक्तेः स्वयमन्यथाकरणेपि न वक्रो
क्तिर्व्याप्तिः॰ यथा॰ काले वारिधराणामपतितया नैव शक्यते स्थातुं॰ उत्कंठितासि तरले नहि
नहि सखि पिच्छिलः पंथाः॰ वर्णसाम्यमनुप्रासः॰ स्वरवैसादृश्येपि व्यंजनसाम्यमनुप्रासः॰
छेकवृत्तिगतो द्विधा॰ छेको विदग्धः इहास्मत्क्ताः पश्चिमः ॥ छेकानुप्रासः॰ तथा च छेकवृद्ध

॥५४२॥

न त्वाक्षेकानुप्रासादुत्युच्यत इति केचित्. वृत्तिर्मधुररसादिव्यंजिका तत्तदानुपूर्वीरूपा. ना
तो ग्रातन्प्रा ग्राम्यानुपाधिस्यामिति शेषः. तत्र छेकानुप्रासो वृत्त्यनुप्रासश्चेति द्विधा नेयः. कि
यः स्वरूपमित्याह. ग्रानेकस्य सकृत्पूर्वः अनेकस्यार्थाद्व्यंजनस्य सकृदेकवारं साम्यं छेका
नुप्रासः. यथा. ततोरुणपरिस्पंदमंदीकृतवपुः शशी. दध्रे कामपरिक्षामकामिनीगंडपांडु
तां. एकस्याथ सकृत्सदृशः. एकस्य अपि शब्दादनेकस्य द्विर्बहुकृत्वो वा साम्यं वृत्त्यनुप्रासः
वृत्तिर्भज्यते. तत्र. माधुर्यव्यंजकैर्वर्णैर्वैदर्भीरीतिरिष्यते. ओजःप्रकाशकैस्तैस्तु गौडी पांचाली तै
स्तथापरैः. सर्वत्र प्रागुदाहृतं. अनंगरंगप्रतिममित्यादि. मूर्ध्नामुद्वृत्तकृत्तेत्यादि. अपसारय
घनसारमित्यादि. शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः. शाब्दः शब्दगतोनुप्रासः शब्द
श्च पदं प्रातिपदिकं वा. पदानां सः. सः लाटानुप्रासः. प्रागुदाहृतं. यस्य न सविधे दयिते त्यादि.
पदस्यापि यथा. वदनं वरवर्णिन्याः सत्यं तस्याः सुधाकरः. सुधाकरः क्व नु पुनः कलंकविक
लो भवेत्. वृत्तावन्यत्र तत्र वा नाम्नः. स वृत्त्योभयत्र. एकस्मिन्समासे भिन्ने वा समासे समा
सासमासयोर्वा नाम्नः प्रातिपदिकस्य न तु पदस्य सारूप्यं. यथा. सितकरकररुचिरविभा विभ
भाकराकार धरणिधर कीर्तिः पौरुषकमलोकमला सापि तवैवास्ति नान्यस्य. तदेवं पं
चधा मतः. अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकं. अर्थभिन्नानामिति. एकार्थ
कत्वे भिन्नानामपि त्वर्थः. तेन लाटानुप्रासे नातिप्रसंगः. उभयोरेकस्य वा निरर्थकत्वे संग्रहः. स

७

२

मरन्नमरस्सो यमित्यादि। सेति यैर्लोरसादृत्यादि वैलक्षण्येन तेनैव क्रमेण स्थिता। पादतद्भागव
र्णतद्वाव्यनेकता। पादः प्रथमचतुर्थो भागः तद्भागः तदर्द्धं तदर्द्धादिरूपः। क्रमेणोदा। यमित्युक्तेः
संचल्लवपविभर्त्तिर्निरन्तरमृदुललता वहतीरसभाजनं। वसतिचात्र वनेषु वतीगणो मृदु
लतामहती सुभावनं। यदानलो यदानतोनयात्ययं नमात्यय। शिवेहितां शिवेहितां स्मार
मितां स्मरामितां। ताइतारतरैरतैरुत्तरोत्तरतोरुतैः रतात्तीतितिरीरीतितीतरीरे तरोतरो।
एवमर्द्धवृत्तिश्लोकावृत्त्यादिभेदा द्रष्टव्याः। वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः श्लि
ष्यन्ति शब्दाः श्लेषोऽसौ। अर्थभेदेन शब्दभेद इति दर्शने काव्यमार्गे स्वरो न गण्यत इति च न
यवाच्यभेदेन भिन्ना अपि यद्युगपदुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते स श्लेषः।
यथा। महत्सागदयायुक्तः सत्यभामासमन्वितः भवान्वानगवान्वापि नातो भेदः परस्परं।
अयं सभंगश्लेषः अभंगश्लेषो यथा। योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः शतकोटि
दतां बिभ्रद्विबुधेन्द्रः स राजते। अत्राभिधानियंत्रणमावाद्यावयवयोर्वाच्यौ। अयं शब्द
श्लेषः। यथा। स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं। अहो सुसदृशी वृत्तिस्तुलाको
टेः खलस्य च। अत्रान्येनोद्रेकमायातीति पाठेऽपि भवति श्लेषोऽयमित्यर्थश्लेषोऽयमि
ति। एवं सकलन्नकलं पुरमेतज्जातं संप्रति सुधांशुबिंबमिवेत्यादौ श्लेषप्रतिभोत्पत्तिहे
तुरुपमा। न तूपमाप्रतिभोत्पत्तिहेतुः श्लेषः। यतः श्लेषस्यैव साम्यनिर्वाहकता श्लेषव

अत्र श्लिष्टाः शब्दाः परिवृत्तिं न सहन्ते। यत्र तु शब्दाः परिवृत्तिसहन्ते सोऽर्थश्लेषः। ५

ननु साम्यस्यैव श्लेषनिर्वाहकता। १

र

या

॥४३॥

॥४३॥

43

यतः प्राक् सामस्त्यानुपूर्व्या स्थितेः । अत्र सकलशब्द एव साधारणो धर्मः । अथवा सकलक-
लत्वयोरेकशब्दबोध्यत्वेन साजात्यमिति बोध्यं । एवं अबिंदुसुंदरीति नित्यं गलन्मुक्तावल्येव बिंदु-
केत्यादौ श्लेषः प्रतिभोत्पत्तिहेतुर्विरोधो न तु विरोधप्रतिभोत्पत्तिहेतुः श्लेषः । श्लेषो हि अर्थ-
द्वयस्योपस्थापकतया बोधविषयत्वं । इह तु एकस्यैवान्यस्योपस्थितिमात्रं । तथा सद्वंशमुक्तामणिः ।
नान्यः कौशिकिरिव स्वस्त्यश्लेषो कौ महान्भावानं । अनुरागवती संध्या दिवसस्तत्पुरःसरः । अहो दै-
वगतिश्चित्रा तथापि न समागमः ॥ इत्यादौ परंपरितरूपकव्यतिरेकसमासोक्तिषु श्लेषस्य नि-
र्वाहकत्वं न तु श्लेषे एव विश्रांतिरिति । अर्थचित्रं प्रकीर्त्यते । तच्चित्रं यत्र पद्माद्याकृतिहेतुता । संनिवे-
शविशेषेण यत्र न्यस्ता वर्णाः पद्माद्याकारतामुल्लासयंति तच्चित्रं । यथा । भासते प्रतिभासाररसा-
भाविताहताश्रिभा । भाविताऽत्माशुभा वादे देवाभा बत ते सभा ॥ पद्मबंधः । रसासाररसासार सायता-
क्षक्षतायसा । सातावातततवातासारक्षतस्वस्वतक्षर ॥ सर्वतोभद्रः ॥ एवमन्येऽपि खड्गबंधादयो
ऽप्यूह्याः । पुनरुक्तवदाभासो विभिन्नाकारशब्दगा । एकार्थतेव शब्दस्य । अर्थांतरसंक्रमितवा-
नुसर्तव्याः । पुनरुक्तवदाभासो विभिन्नाकारेति । विजातीयानुपूर्वीकाद्वित्यर्थः । तत्र च नानुपूर्वी मे-
दे इति भावः । एकार्थतेव नैकार्थता तत आभासनं । पुनरुक्तवदाभासः । पुनरुक्तस्येव पुनरुक्तवत् । आभासो ग्रा-
ह्यः । एकार्थत्वे नैवापाततो भासनं । पुनरुक्तवदाभासः । पुनरुक्तस्येव पुनरुक्तवत् । आभासोऽग्रा-
ह्यं । स च शब्दस्य केवलशब्दनिष्ठः । यथा । चकासत्यंगनारामाः कौतुकानंदहेतवः । तस्य राजः सु-
मनसो विबुधाः पार्श्ववर्तिनः । तथा शब्दार्थयोरयं । यथा । तनुवपुरजघन्यो सौ करिकुंजररुधिर

रक्तः खरनखरः तेजोधाममहः पृथुमनसामिंद्रो हरिर्जिष्णुः। अत्र एकस्मिन् पदे तनुकरिरक्ते-
त्यादिरूपेण परिवर्त्तितेनालंकारः। अपरस्मिंश्च वपुः कुंजररुधिरादिरूपे परिवर्त्तितेपि न सहीय
त इत्यर्थनिष्ठ इत्युभयालंकारोयं। इति शब्दार्थालंकारयोर्मध्ये कथितः। अथार्थालंकारानाह। साध
र्म्यमुपमाभेदे। समानैर्बहुभिर्धर्मैः संबंधः साधर्म्यं। तद्भिन्नत्वे सति तत्कृतम्। यो धर्मेनत्वमुपमेति
निर्गलितोर्थः। भेदग्रहणमनन्वयव्यवच्छेदाय। पूर्णा लुप्ता च। उपमानोपमेयसाधारणधर्मोपमाप्रति
पादकानामुपादाने पूर्णा। एकस्य द्वयोस्त्रयाणां वाऽनुपादाने लुप्ता। साऽपि मा श्रौत्यार्थी च भवेद्वा
क्ये समासे तद्धिते तथा। यथेववादिशब्दा यत्परास्तस्यैव श्रुत्यैवोपमानताप्रतीतिरिति यथेववा
दिशब्दसत्त्वे श्रौती। तथैव तस्य तत्रैवेत्यनेन इवार्थे विहितस्य वतेरुपादाने। सदृशतुल्यादिशब्दयोगे
सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते इत्यादौ प्रहृताप्रहृतत्वेन वालोचने
वोपमेयोपमानताप्रतीतिरित्यार्थी। तद्धितेन तुल्यमित्यादिना विहितस्य वतेः स्थितौ। इवेन नित्यसमा
सो विभक्त्यलोपश्चेत्यनेन नित्यसमासे इवशब्दयोगे समासगा। समासानुशासनप्रयोजनं ऽग्निरि
व राज इत्यादौ। क्रमेणोदाहरणं। उत्प्राय हृदि लीयन्ते दरिद्राणां मनोरथाः। बालवैधव्यदग्धानां कुलस्त्री
णां कुचा यथा। चकितहरिणलोललोचनायाः क्रुधि तरसमरुणाभिरामशोभं। सरसिजमिदमाननं
च तस्याः सममिति चेतसि संमदं विधत्ते। वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वं
दे पार्वतीपरमेश्वरौ। आद्यंतमध्यरहितं दशाहीनं पुरातनं। अद्वितीयमहं वंदे मद्वस्त्रसदृशं हरिं

सि३

गांभीर्यगरिमा तस्य सत्यं गंगाभुजंगवत्· दुरालोकः स समरे निदाघांबररत्नवत्· अत्र धर्मलुप्ता· तत्र सा
रण धर्मलोपे भवत्लुपमा· यथा· वाक्यं तस्याम् तं यथा· एवमन्यत्र· तथाउपमानानुपादाने भवत्लुप
मा· यथा· कंठअ कलिआइ दुके अइ व एणाइमा लइ कुसुम सरिछं भमर भमंतो एण पाविहिंत यथा· वादेलो
पसमासे क्यचि क्वचित्· एण लुप्लिभवत्लुपमा· क्रमेण यथा· ततः कुमुदनाथेन कामिनीगंडपांडुना· ने
त्रानंदेन चंद्रेण माहेंद्री दिगलंकृता· पौरंस्तु तीपतिजनं समरांतरेस्सा वं तः पुरीयति विचित्रच रित्रवे
तुः· नारीयते समरसीम्नि कृपाणपाणिरालोक्य तस्य चलितानि सपत्नसेना· स्वधर्मनिदाघघर्मांशुद
र्शपयंति तं परे· सपुनः पार्थसंचारसंचरत्यवनीपतिः· तथा धर्मवाची लोपे क्विप्समासगा· य
था· सविताविधवति विधुरपि सवितरति तथा दिनंति यामिन्यः· यामिनयति दिनानि च सुखदुः
खवशीकृतैमनसि· समासे यथा· राजं धर्मोपमानयो लोपे तिभवत्लुपमा· यथा· न काव्यसह शं किंचि
दन्यदस्तीह लोके· एवं क्वचि वाच्युपमेयलोपे यथा· कृपाणोदयदोर्दंडः समहस्रायुधीयस
ति· अत्रात्माउपमेयः· एवं त्रयाणां वादिधर्मोपमानानां लोपे जनवत्लुपमा· यथा· मृगनयना मानसम्
हरती स्नादो सममन्य पमाने त्यादिना यदा समासलोपो· अनयेनेव राज्यश्रीर्दैन्येनेवमनस्विता· मन्दे
स्नाथविषादेन पद्मिनी क्लिहिमांभसा· एकस्यैव बहूपमानोपादाने मालोपमा· तथा यथोत्तरमुप
मेयस्योपमानत्वेरसनोपमा बोध्या· मंदवंतात्मोयेन पश्यइ द्वलनया· मतिरिवमूर्तिर्मधुरा म
तिरिवसभा प्रावयुता· तस्य सभेव जयश्रीः शक्या जेतुं नरपस्य न परेषां· एवमन्यदपि बोध्यं

म४

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे । अनन्वयः । अनेनोपमेयत्व इति उपमानत्वमुपमेयत्वं
चेत्यर्थः । उपमेयोपमाकारणतयैकवाक्यगौ इति । उपमानान्तरसंबन्धोऽन्वयः तदभावोऽनन्वयः । अ
तोऽत्र उपमानान्तरव्यवच्छेदः । न च समत्वोऽस्य इत्युपमानान्तरस्य भेदः । यथा । गगनं गगनाकारं सागरः साग
रोपमः । रामरावणयोर्युद्धं रामरावणयोरिव । विपर्यास उपमेयोपमा तयोः । तयोरुपमानोपमेय
योः विपर्यासः परिवृत्तिः । अर्थाद्वाक्यद्वये । उपमेयेनोपमा उपमेयोपमा । यथा । कमलेव मति
र्मतिरिव कमला तनुरिव विभा विभेव तनुः । धरणीव धृतिर्धृतिरिव धरणी सततं विभाति
बत तस्य । संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् । समेनोपमानेन । समेनेत्यनन्तरमेकरू
प्येणेति शेषः । तथा च समेनैकरूप्येण संभावनमुत्प्रेक्षेत्यर्थः । संभावना चोत्कटकोटिकः सं
देहो यं चन्द्र एवमभिविष्यतीत्याकारः । यथा । अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठन
खांशुभिन्नया । पुरः प्रवालैरिव पूरितार्धया विभान्तमच्छस्फटिकाक्षमालया । ससंदेहस्तु
भेदोक्तौ तदनुक्तौ च संशयः । भेदो वैधर्म्यं । प्रकृतस्य समेन यदित्यनुवर्तते । तुर्भिन्नक्रमे । स
दिति लिङ्गात्संशय इत्यनेनान्वेति । तथा च प्रकृतस्य समेन संशयस्तु ससंदेहनामालं
कार इत्यर्थः । भेदोक्तौ यथा । द्विधाकृतात्मा किमयं दिवाकरो विधूमसप्तार्चिः किमयं हुताश
नः । गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः । पतत्यधो धाम विसारि
सर्वतः किमेतदित्याकुलमीक्षितं जनैः । तदनुक्तौ यथा । अस्याः सर्गविधौ प्रजापतिरभू

ंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयंनु मदनो मासोनुष्पाकरः· वेदाभ्यासजडः कथंनु विष
यव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः· तद्रूपकमभेदो य उप
मानोपमेययोः· अथवा· उपमैव तिरोभूतभेदा रूपकमिष्यते इति· यथा· अयं रुक्ष्मणा
गतकालवपुर्जलधिं व्यतीत्य शशिदाशरथिः· परिवारितः परितऋक्षगणैस्तिमिरौघराक्ष
सकुलं बिभिदे· यथा वा· हिंदोलिके यमिंदोः कलिकानंगस्य कौसुमी नयति· मोपानीयम
नोभ्रं शंशोलक्ष्मिप्रकाशिचेतांसि· माला उपूर्ववत्· पूर्वं तत् मालोपमानवत्· यदा एकस्मिन्बहु
व आरोपितास्तदा मालारूपकं· यथा· रूपामृतस्य वापी कापि जयश्रीरनंगस्य· विभ्रमरसै
कसंपत्प्रयतिनिर्झरा दीनं दकं दली बाला· निपतारोपणोपायः स्यादारोपः परस्य यः· तस्यारोप
रितंभिन्नं चेदाचक्षे भेदमाश्रिता वा· यथा· विद्धन्मानसहंस वैरिकमलासंकोचदीप्रद्युते दुर्गामार्ग
णीलगोहितमर्पितस्वीकार वैश्वानर· सत्यप्रीतिविधानदक्ष विजयप्राग्भाव भीमप्रभो सा
म्राज्यं वरवीरवत्सर शतं वैरिंच मुख्यैः क्रियाः· मानसमेव मानसं कमलायाः संकोच एव कम
लानां मसंकोचः दुर्गाणाममार्गणमेव दुर्गामार्गणं सभितास्वीकार एव समिधां स्वीकारः· स
त्ये प्रीतिरेव सत्यामप्रतीतिः· विजयः पराभव एव विजयोऽर्जुनः· एवमारोपणनिमित्तोऽहं सा
रारोपः· यद्यपि शब्दार्थालंकारोऽयं तथापि प्रसिद्धिवशाद्गौक्तः· भेदमाश्रि यथा· आज्ञानं

जयकरिणः प्रतापतपनस्य पूर्वाद्रिः । सेतुर्विपत्तिजलधेर्धरणिभुजस्तेभुजो जयति । अत्र जया
दिभिन्नशब्दवाच्यस्य करित्वाद्यारोपे भुजस्यानेनताद्यारोप्यावुच्यते । साह्यपि पूर्ववदेव द्विधा ।
प्रकृतं यन्निषिध्यान्यत्साध्यते सात्वपह्नुतिः । निषिध्य । उपमेयमसत्यं कृत्वा । यथा । स्फुट
नीलोत्पलपटले सुधामयूखे सुधामसि । मन्यामहे नितं बिनिने पङ्कः परिस्फुरति । य
भावा । तदोजसस्तदृशासः स्थितावियमोवधीति चित्ते कुरुते यदा यदा । तनोति तन्मानोः परिवेष
कैतवात्तदा विधिः कुण्डलनीं विधोरपि । एवमियं भङ्ग्यन्तरेण्यपह्नुतोः । द्योतयित्वा कमप्यर्थं गो
पनीयं कथं च न । यदि श्लेषेणान्यथा वान्यथयेत्सापह्नुतिः । यथा । कालेस्मिन्जलदनामि
त्यादि । प्राग्युक्तं । श्लेषः समासा एकस्मिन्यत्रानेकार्थताभ्यन्तरो भवेत् । अनेकार्थताद्या
न्या निरूढलक्षणयाच यत्र भवति स श्लेषः । यथा । उदयते दिङ्मालिन्यं निराकुरुते तरो
यतिनिघ्नं निद्रामुद्रां प्रवर्त्तयति क्रियाः । रचयति तयां स्वैराचारप्रवर्त्तनकर्त्तनं बत बतल
सन्नेत्रः पुण्यो विभाति विभाकरः । विभाकरः सूर्यः । राज्याभिषेककाले पुरोहिता दिग्भिस्त
लैस्त्यत्वेन प्रतापरुद्रादिवत्संकेतितो नद्यविशेषश्च । उदयपक्षे बालं संपदं वदि शं मालि
न्यमंधकारसंबंधादिशानां जनानां कुवेशत्वं च । एवमन्यान्यपि पदानि बोध्यानि । परो
क्तेर्भेदकैः श्लिष्टैः समासोक्तिः । प्रकृतार्थप्रतिपादकेन वाक्येन श्लिष्टानां प्रकृताप्रकृतसा
साधारणानां भेदकानां विशेषणानां माहात्म्यात् तु विशेष्यसमर्थादप्रकृतस्या

११४८।
११४९।

विधानं प्रतिपादनं व्यंजनं समासेन संक्षेपेण अर्थद्वयस्य कथनात् समासोक्तिः । यथा । लिहिउण
नुसबाकुफ्फ संजीए कोविउद्धसो । अ अलछीतुह विरहे एण कुओ लोड्डब्बे नाएण सा । अत्र नन्दिश्रीप
ण सामर्थ्यात् जयलक्ष्मीव्यवहारे कान्ताव्यवहारस्य आरोप्यमाणस्य च मत्कारकारितेति । इय
मन्यैरेकदेशविवर्त्तिरूपकमिति मण्यते । असंबद्धवस्तुसंबंध उपमापरिकल्पकः । निदर्शनेति ।
निदर्शनात् दृष्टान्तीकरणं । वस्तुसंबंधो द्विधा । वाक्यार्थ पदार्थ भेदात् । तत्राद्यो यथा । क्व सूर्यप्र
भवो वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं । अत्राल्पविषयमत्या ल
रघुवंशवर्णनं नन्वादित्येको वाक्यार्थः । अपर उडुपेन सागरतरणं । न चोपमानोपमे
यभावं विना तयोः परस्परसंबंधः संभवतीति उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशव
र्णनमित्युपमायां पर्यवसानं । द्वितीयो यथा । अस्याः सुरवस्य लीलां वहति शरच्छर्वरीनाथः । अ
त्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशोयमित्युपमायां पर्यवसानं । पूर्वत्र वाक्या
पि बोध्या । यथा । दोर्भ्यां तितीर्षति तरंगवतीभुजंगमादातुमिति करे हरिणांकबिंबं । मेरुं लि
लंघयिषति ध्रुवमेष देव यत्ते गुणान् गदितुमुद्यममादधाति । स्वस्वहेत्वन्वयस्योक्तिः क्रियय
ये वहि सापरा । क्रिययैव स्वस्वकारणयोः संबंधो यो वगम्यते उपमापरिकल्पकः इत्यनुव
र्त्तते सा अपरा निदर्शना । यथा । उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् । शैलशे
खरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः । अत्र पततीति क्रियया पतेदिति क्रियया

सहृन्नायुवेक्षिति इत्युन्नतपदप्राप्तिरूपस्याकारणसंबंधः ख्याप्यते. स चान्यस्यापि लघोरुन्नतप
दप्राप्तिस्तद्वत्प्रतीतो येत्युपमायां पर्यवस्यतीति निदर्शना. इयं संबंधवद्वस्तुसंबंधमूलेति
पूर्वतो भेदः. अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया. अत्र चाप्राकरणिकस्यार्थस्याभिधानेन
प्राकरणिकस्यार्थस्याक्षेपो ऽप्रस्तुतप्रशंसा. अस्याश्च पञ्चविधत्वेपि. तुल्ये प्रस्तुते तुल्यांत
रस्याभिधाने ऽतीव चमत्कार इति तदेवोदाह्रियते. यथा. आतनितनेतमोंधकूपगर्भोद्दिव
तुद्धारिकरेण येनाविश्वं. वरमिति गिरिगभीरगह्वरान्तः पतति स एष न कैश्चिदीक्ष्यतेपि. अत्रा
प्रस्तुतस्य तथाविधस्य रवेरभिधानेन कृतानेकोपकारस्य कस्यचिन्महापुरुषस्य दुर्दशा
यां केनापि किंचिन्नोपकृतमित्याक्षिप्यते. एवमन्यत्रापि बोध्यं. यथा. अविदग्धवणिग्वीथीधूस
रितो मणिः. केनापि तु पण्यमनुपाविद्धपापरिपच्यते. अत्रेदृशस्य मणेरभिधानेन केनापि
दुर्विदग्धेनावमानितो गुणवान्नरः केनापि विज्ञोत्तमेन सत्कर्तव्य इत्याक्षिप्यते. निगीर्याध्यव
सानं तु प्रकृतस्य परेण यत्. प्रस्तुतस्य तदन्यत्वं यद्यर्थोक्तौ च कल्पनं. कार्यकारणयोर्यश्च
पौर्वापर्यविपर्ययः. विज्ञेयातिशयोक्तिः सा. प्रकृतं निगीर्य असाधारणधर्मेणानुक्तातेनस
पकाद्यवच्छेदः. अध्यवसानं तत्तादात्म्येनाध्यवसायः. यथा. लतामूले लीनो हरिणपरिहीनो हिम
करः स्तनद्वन्द्वं ज्ञाता रागल्लतिजलधाराकुवलयात्. धुनीते वं कंतिलकुसुमजन्मापि पवनो
गृहद्वारे पुष्पोपरि गणसतिकस्यापि हृतिनः. अत्रानन्यत्वेनाध्यवसीयते साऽपरा. यथा. अ

धूली

न्यदेव हि तत्त्वाद एव मन्ये वा स्यात्तत्तु द्युतिः। तन्मन्ये इव नानेषा सामान्यस्य प्रजापतेः। यद्यर्थेति।
यदि शब्देन चेत्यर्थेन वा यत्कल्पनं अर्थादसंभवितो र्थस्य सा तृतीया। यथा। उभौ यदि व्योम्नि
पृथक्प्रवाहावाकाशगंगापयसः पतेतां। तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य
वक्षः। कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वकालत्वं समकालत्वं च चतुर्थी। यथा। हृदय
मधिष्ठितमादौ मालत्याः कुसुमचापबाणेन। चरमं रमणीवल्लभलोचनविषयं त्वया भजता। स
मकालौ यथा। सममेव समाक्रान्तं द्वयं द्विरदगामिना। तेन सिंहासनं पित्र्यमखिलं चारिमण्ड
लं। इति वस्तूपमा लुप्ता। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः। सामान्यस्य साधारण
धर्मस्य वाक्यद्वये उपमेयवाक्ये उपमानवाक्ये च। यथा। देवीभावं गमिता परिवारपदं कथं भ
जत्येषा। न खलु परिभोगयोग्यं दैवतरूपांकितं रत्नं। अत्र कथमित्यनेन खल्वित्यनेन चानौचि
त्यं प्रत्याय्यते। इत्येकस्यैव अनुचितत्वरूपसामान्यस्य शब्दभेदेन द्विरुपादानं। यदि दहत्यन
लोऽत्रेत्यादि मालारूपाप्येषा बोध्या। दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिंबनं। यथा योगिन्नमते षां
साधारणधर्मादीनां प्रतिबिंबनं तत्र यत्र वाक्यद्वये विशेष्यस्य विशेष्येण विशेषणेनां च विशे
षणैर्यथायोगमनुरूपयोपमानाभावः प्रत्याय्यते। यथा। दर्पान्धगन्धगजकुंभेत्यादौ यथा कटाक्ष
कृपाणयोरुपमानोपमेयभावः। तथा लोचितिः कषायकांत्योरपि। दृष्टांतो निश्चयो यत्र सदृशा
तः। गृहीतसामान्यलक्षणः यत्र दृष्टान्तवाक्येन दार्ष्टान्तिकवाक्यार्थनिश्चये निश्चयस्य प्रामाण्यग्र

९८

लोभवतीत्यर्थः॥ यथा· त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितं· आलोके हि हिमांशोर्वि
कसति कुमुदं कुमुद्वत्याः॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनां· सैव क्रियासु बह्वीषु कारकस्येति
दीपकं· वृत्तिरुपादानं धर्मस्य क्रियारूपस्य· एकस्थस्य समस्तवाक्यदीपनाद्दीपकं· यथा· किवणा
णधणं णाआणफणमणी केसराणि सीहाणं· कुलवालिआण थणआ कत्तो छिप्पंति अमुआणं· अत्र
स्पृश्यंत इति क्रिया सकृदुपात्ता· एवं बहुक्रियासु एकस्य कारकस्योपादानं बोध्यं· मालादीपकमाद्यं
चेद्यथोत्तरगुणावहं· पूर्वेण पूर्वेण वस्तुनोत्तरोत्तरं वस्तूपक्रियते तन्मालादीपकं॥ यथा· संग्रामांग
णमागतेन भवता चापे समारोपिते संजातैं पंथि योधनिवहे सांमुख्यमासादितं· कोदंडेन शराः श
रैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं· अत्र निःसल्लभ्र लोक
त्रयव्यापि कीर्तिलाभान्तं पोत्कर्षः प्रतीयते· तत्र पूर्वं यथायोगमुत्तरत्रोपकाराः॥ नियतानां स
कृद्धर्मः सा पुनस्तुल्ययोगिता· नियतानां प्राकरणिकानामेव वा· वृत्तिरित्यनुवर्तते· अर्थवशाद्विभ
क्तिपरिणामस्तथा च वर्त्यते उपादीयते सकृद्धर्म इत्यर्थः॥ यथा· पांडुक्षामं वदनं हृदयं सरसं तवाल
सं च वपुः· आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः॥ अत्र विरहानुभावत्वेन प्रकृतानां पांडुतादीनां
सकृदुपात्तावेदनक्रियान्वयः· एवमप्रकृतानामपि· उपमानाद्यदन्यस्य व्यतिरेकः स एव सः· अन्यस्य
उपमेयस्य व्यतिरेक आधिक्यं· यथा· इयं सुनयना दाशीकृततामरसश्रिया· आननेनाकलंके
न जयतींदुं कलंकिनं· हरवन्न विषमदृष्टिर्हरिवन्नो विधुतविततवृषः· रविवन्न चातिदुःसह
करतापितभूः कदाचिदपि॥ इति मालापि बोध्या· आक्षेप उपमानस्य प्रती

परि

॥५२॥ म

॥५२॥

पमुपमेयता। तस्यैव यदि काकुल्या तिरस्कारनिबंधनं। इति द्वैनयरूपस्य प्रतीपस्यात्र व्यतिरेक
एवान्तर्भावः। यथा। लावण्यौकशि राजनि राजते त्वय्यस्मिन्निभिंदुबिंबेन। द्वितीयं यथा। पूर्णसरिवबत
वचनीयं तव वदनेनोपमीयते चंद्रः। अत्रोपमेयस्य न्यूनतायामपि व्यतिरेकमिच्छंति। यथा। हनुम
दाद्यैर्यशसा मम याहुनर्हि यासेहैर्दुत्य पथः सितीकृतः। तथा। मया रामत्वकुशलवसुतानत्वधि
गता। इत्यादिषु। निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मत
तः। वक्तुमिष्टस्य विवक्षितस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं च विशेषं वक्तुं निषेधो निषधइव यः
स यथाक्रमं वक्ष्यमाणविषय इति द्विविध आक्षेपः। यथा। ए एहि किंपि कीए कए णिग्घिण भणामि
अलमह वा। अविआरिअकज्जारंभआरिणी मरउ ण भणिस्सं। अलमिति न भणिष्यतीत्यर्थः। न भणि
ष्यामीति यो नरूपत्वं स्वेदातिशयपोषकं। अत्र वक्ष्यमाणायां मरणस्थावेषंतस्या अशक्यवक्तव्य
त्वं अलमित्यादिना निषेधो व्यंजयति। यथा। ज्योत्स्ना चंदनमालोकाः नाहलं तां परिप्राप्ताः। संप्रति
मृदृशोऽहं ताम्येन किमुक्तेन न ब्रूमः। अत्र न ब्रूम इति निषेधो विरहे शीतलानां दुःसहत्वमतिप्रसिद्धमिति
व्यनक्ति। क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना। क्रिया कारकव्यापारः। वैयाकरणाः क्रिया
याएवहेतुतां मन्यंते। तथा च हेतुरूपक्रियाप्रतिषेधेपि तत्फलप्रकाशनं विभावना। अप्रसिद्धं कार
णमाक्षिपतीति न विरोधः। यथा। कुसुमितलताभिरहतास्यधत्त रुजमलिकुलैरदष्टापि। परिवर्त
ते स्म नलिनीलहरीभिरलोडितास्यघूर्णिता। विशेषोक्तिरखंडेषु कारणेषु फलावचः। अत्राप्यप्रसि

ङ्कारणं सिद्धौ तौ तिलविरोधः । यथा । निशास्वपद्मं ज्ञिनि पंकजानामामोदमोदस्विनि गंधवाहः । नम्रं
तोः [illegible] बद्धमिति दृढंन्योन्यकंठग्रहणं कृवानो । यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः । यथा
संख्यं नामालंकारः । यथा । एकस्त्रिधा वससि चेतसि चित्रमत्र देवद्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन् शौर्योष्मणा च विनयेन च लीलया च । सामान्यं वा विशेषो वा त
दन्येन समर्थ्यते । यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा । अनुपपद्यमानतया संभाव्यमान
स्यार्थस्य उपपादनार्थं यदर्थान्तरस्य न्यसनं उपपादकत्वेनोपन्यासः सोऽर्थान्तरन्यासः । अत्र साध
र्म्येण सामान्यं विशेषेण समर्थ्यते । यथा । निजदोषावृतमनसामतिसुंदरमेव भाति विपरीतं । प
श्यति पित्तोपहतः शशिशुभ्रं शंखमपि पीतं । साधर्म्येण विशेषः सामान्येन यथा । सुसितवसना
लंकारायां [illegible] मित्यादि । वैधर्म्येण द्वौ यथा । गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्य
ते । असंजातकिणस्कंधः सुखं स्वपिति गौर्गडिः । एवमन्योप्युदाहार्यः । विरोधः सोऽविरोधेपि विरुद्ध
त्वेन यद्वचः । वस्तुवृत्तेनाविरोधेपि विरुद्धयोरिव यदभिधानं स विरोधः । यथा । अभिनवनलिनी
किसलयमृणालैर्वलयादि दवदहनराशिः । सुभग कुरंगदृशोस्या विधिवशतस्त्वद्वियोगपविपाते
अस्य बहवो विषयाः स्वयं लक्ष्यतोनुसर्तव्याः । कार्यकारणभूतयोर्धर्मयोर्भिन्नदेशतया भासनं
सो संगत्याख्यो लंकारो विरोधएवांतर्गतः । यथा । जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलि
अं । दंतक्खवदं कवोले बहूए वेअणा सवत्तीणं । तथा । सत्यपि कार्यस्य कारणरूपानुकारेपाच

योर्गुणोक्तिः येन च मिथो विरुद्धतां ब्रजतः स विषमालंकारो यत्रैवांतर्भूतः । यथा । सद्यः करस्पर्श-
मवाप्य चित्रं रणे रणे यस्य कृपाणलेखा । तमालनीला शरदिंदुपांडु यशस्त्रिलोकाभरणं प्रसू-
ते । यद्यथा साधितं केनापि परेण तदन्यथा । तथैव यद्विधीयेत स व्याघात इति स्मृतः । इत्यनेन लक्षित-
स्य व्याघातस्याविरोध एवांतर्भावः । यथा । दृशा दग्धं मनसिजं जीवयंति दृशैव याः । विरूपाक्षस्य
जयिनीस्ताः स्तवे वामलोचनाः । स्वभावोक्तिस्तु डिंभादेः स्वक्रियारूपवर्णनं । स्वयोस्तदेकाश्रययो-
रूपं वर्णः संस्थानं च । यथा । लंबालकावलंबाद्दवितलं बाहुधूलित स्वलनस्मरणं । क्वणितमणिमंजुरसनं
मुकुलितदृशं मं हरिं वंदे । व्याजस्तुतिर्मुखे निंदा स्तुतिर्वा रूढिरन्यथा । व्याजेन स्तुतिर्व्याजरूपा स्तु-
तिर्वा मुखे प्रथमतः रूढिः पर्यवसानं । यथा । दातारं कृपणं मन्ये मृतोप्यर्थं न मुंचति । अदाता पुरुषस्त्या-
गी धनं संत्यज्य गच्छति । सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं । सहार्थस्येत्यनेन समं सार्थमित्या-
देरपि परिग्रहः । एकमिति । एकप्रतियोगिकान्वयबोधकमपीत्यर्थः । द्विवाचकं द्विप्रतियोगिका-
न्वयबोधकं । अयं भावः । विशेषणपदानां विशेष्यान्वितस्वार्थबोधकत्वस्योत्सर्गिकत्वं । प्रकृते
च सहार्थपदस्य सामर्थ्याख्यातर विशेष सहकारेण यत्सार्थप्रतियोगिकान्वयप्रतिपादनमित्युभ-
यप्रतियोगिकस्वार्थान्वयबोधकमिति । यत्रैकस्य साधारण्येनान्यस्य गुणत्वेनैकधर्मान्वयित्वं
सा प्रसक्तं कारं इति पर्यवसितोर्थः । तेन चैत्रमैत्रौ सह पचत इत्यत्र नातिप्रसंगः । समुच्चये द्वयोः स-
धान्येनान्वयोऽस्त्वेकस्य । यथा । सा कौमुदी वसनिशामिः भ्रासा दीर्घा भवंत्यधः । अपि तनुलतेया स-

जन २१

तत्रो ज्ञीवाशा दुर्वंचका ज्ञातो। विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः। क्वचिदशोभनः क्वचित्
शोभनः। यथा। विना रजन्या कमलं द्रोऽविना चन्द्रेण कानिशा। द्वितीयो यथा। विनानयेन राज्यश्रीः
स्वाध्वी यो भिन्नलापजं। परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः। यथा। ताम्बूलं कमलवनानां द-
लाद्दत्ते चसोरसं पवनः। तान्यपि मुदं जनेभ्यो ददाति तो लब्धदर्शनान्मुखैः। प्रत्यक्षा इव यद्भावाः क्रियं-
तेऽभूतभाविनः। तद्भाविकं। उदा। आसीदञ्जनमत्रेति पश्यामि तव लोचने। भाविभूषणसंभारां
साक्षात्कुर्वे तवाकृतिं। काव्यलिंगं हेतोर्वाक्यपदार्थता। यथा। आनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः। अत्र पूर्वार्धवाक्यार्थो पुटपाकप्रकाशत्वे हेतुः। पदार्थता
यथा। त्वत्संतःस्त्रोतुमर्हति सदसद्व्यक्तिहेतवः। हेमः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा। अत्र स-
दसद्व्यक्तिहेतुत्वं श्रवणार्हत्वे हेतुः। पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः। वाच्यतावच्छेदकं
विना प्रकारान्तरेण वाच्यार्थस्य व्यंजनया यत्प्रतिपादनं तत्पर्यायेण भंग्यन्तरेण कथनात्पर्या-
योक्तं। यथा। यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता। मदेनैरावणमुखे मानेन हृदये हरेः। अ-
त्रैरावणशक्रौ मदमानविमुक्तौ जाताविति व्यंग्यमपि शब्देन प्रकारान्तरेणोच्यते। तेन यदेवोच्यते त-
देव व्यंग्यं तथा नोच्यते। उदात्तं वस्तुनः संपत्। संपत्समृद्धियोगः। यथा। मुक्ताः केलिविसूत्रहार-
गलिताः संमार्जनीभिर्हृताः प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालांघ्रिलाक्षारुणाः। दूराद्दाडिमबीज-
शंकितधियः कर्षन्ति केलीशुकाः यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितं। महतां चोप-

॥५०॥ 50 ॥५०॥

लक्षणं। उपलक्षणमङ्गभावः। अर्थादुपलक्षणीयेऽर्थे। यथा। तदिदमरण्यं यस्मिन्दशरथवच

वः नानुपालनक्लेशसज्जी। सौमित्रिसन्धाकुसुमम् [illegible] कार रक्षःक्षयकामः। न चात्र वीरो रसस्तस्येहाङ्गत्वात्। त

त्किञ्चिद्धेतावेकस्मिन्नन्यत्रान्यत्तत्करं भवेत्। समुच्चयोऽसौ। यथा। एष एव निषिमोन [illegible] वमेघः सोऽपि वर्ष

ति तरामविरामं। तत्र वेदविरतं न [illegible] शब्दाः। पूर्णमध्यस्फुतनोः शातमन्यूः। अत्र शातक्रतले न न मेघप

वकारणं। एतदुपरि वर्षणमुक्तं। काव्यलिङ्गे हेतुहेतुमद्भावमात्रं विवक्षितं। न पुनर्हेतूनां गुण

प्रधानभावचिन्ता। अत्र त्वेकस्यैव तत्कार्यकारित्वमन्येतत्सहायकं कुर्वतीति ततो भेदः। नाप्य

सौ समाधिः। तत्र कारणानां काकतालीयत्वयोगे तामर्थं प्रत्येकेन तथेति। ततो भेदः। सत्वन्योऽयु

गुणक्रिये च २ गपद्यद्गुणक्रियायाः। गुणौ च क्रिये च गुणक्रिये यौगपद्ये [illegible] यथा। नयनं तनयं कं च मलिनाम्बरं रोरयः पुन

मिलाद्दिं [illegible] तनुपोच महदयशः। एवं गुणक्रिययोरपि बोध्यं। एकं क्रमेणानेकस्मिन्पर्यायः। एक

नस्तक्रमेणानेकस्मिन्नभिधीयते यत्र स पर्यायः। यथा। नन्वाश्रयस्थितिरियं तव कालकूट केनो

त्तरोत्तरविशिष्टपदोपदिष्टा। प्रागर्णवस्य हृदये वृषलक्षणोऽथ कण्ठेऽधुना वससि वाचि पुनः खला

अन्यस्ततोऽन्य नां। यथा। अनेकस्मिन्नेकं [illegible] मेण सोऽन्यः पर्यायः। यथा। मधुरिमरुचिरं वचः खलानाममृत

महो प्रथमं पृथु व्यनक्ति। अथ कथयति मोहहेतुमन्तर्गतमिव हालाहलं विषं तदेव। अनुमानं तदु

क्तं यत्साध्यसाधनयोर्वचः। यथा। यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं यत्तत्रैव पत

न्ति संततममी मर्मस्पृशो मार्गणाः। तच्चक्रीकृतचापसंहितशरप्रेङ्खत्करः क्रोधनो धावत्यग्रत एव शा

न

[illegible] स्य सत्वेऽपि कवि प्रौढोक्त्यैव तथाभिधानमित्यलं
[illegible] स्वधर: स[illegible] तां स्मर: अत्र वस्तु [illegible] धास्यात्. विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु स: अ
[illegible] त्वे. अन्यथा [illegible] मान्द्यमादित्यत्राधिकत्वास्यात् [illegible] नार्थिताधनुर्मत: संपतिल[illegible]कीर्तय: नसंहतास्तस्य
[illegible] [illegible] महोज्ज्वलमानधन[illegible]धनार्थि [illegible] तुं. व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनं. निगू
[illegible] [illegible] शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोप
[illegible] ढं प्रभिन्नं प्रकाशितं केनापि रूपेण व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः
[illegible] [illegible] साम्यस्येहासंभवात्. यथा. शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोप
[illegible] कृति: प्रहृष्टाप्रकृतेर्यो: साम्यस्येहासंभवात् [illegible] नाचलस्य कर यो रित्यपि
[illegible] [illegible] स्मा चादि विसंष्टुलान्दिनविधि व्यासंगभंगाकुल: शीत्यं बत हिमाचलस्य करयोरित्यपि
[illegible] [illegible] मंडलगलोद्भावता द्व: शिव: किंचित्पृष्टमपृष्टं वा कथितं यत्प्रक
ल्पते तादृगन्यव्यपोहाय परिसंख्या तु सास्मृता. प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयो
जनान्तराभावात्सदृशवस्त्वन्तरव्यवच्छेदाय पर्यवस्यति सा परिसंख्या. अत्र कथनं प्रश्नपूर्वकं
[illegible] [illegible] हरे नाम. किं कार्यं मार्यचरितैः रभिलषितं पूर्वी
तदन्यथा च. यथा. किं ध्येयं विष्णुपदं किं वक्तव्यं हरेर्नाम. किं कार्यं मार्यचरितैः किं भूषणं च वपु
[illegible] यथा. कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते. काठिन्यं कुचयु
गले तरलत्वं नयनयोर्वसति. यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता. तदा कारणमाला स्यात्.
[illegible] [illegible] ल्वेनप्र[illegible] पृष्टस्य कारणगुणप्रकर्षो विनयादवाप्यते. गुणप्रक
उत्तरमुत्तरं प्रति यथा नरं. जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते. गुणप्रक
र्षेण जनोनुरज्यते जनानुरागप्रभवा हि संपद: अयहेतोरभेदत: उक्तोहेतुमता हेतु: प्राचीनैरनुमी

॥५१॥

॥५१॥

51

ना७

ष्ठितः हेतुर्हेतुमानासालंकारः यथा अविरलकमलविकासः सकलालिमदश्च कोकिलानंदः
रम्योयमेति संप्रति लोकोत्कंठाकरः कालः। पावकस्य नो गुणैर्युतैर्भिः शोभूषणभूष्यता। अन्यो
न्यमति बलहेतुयं। अन्योन्यमन्योन्यनामालंकारः। यथा। कंठस्य तस्याः स्तनबंधुरस्य मुक्ताकला
पस्य च निस्तुलस्य। अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः। उत्तरश्रुतिमात्र
तः प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति। असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरं। यथा। ग्राम
नामन्यतः पांथ लवे हवसतिः कुतः। ह्रोपायस्याद्दलं पेनवसतिः श्रोषितालये। योगहितेनवासंदे
हीति वसतियावकाशस्य कस्यापि हृवनममुं वाक्येनोन्नीयते। अत्र वासतीति प्रश्नोऽसतीत्व
र्यः। असंभाव्यं लोकातिक्रान्तगोचरं उत्तरं प्रतिवचनं। यथा। का विषमा दैवगतिः किं दुर्लभं जनो गु
णग्राही। किं सौख्यं सुकलत्रं किं दुःखं यत्खलो लोकः। प्रश्नपरिसंख्यायामन्यव्यपोह एव तात्प
र्यं इह तु वाक्य एव विश्रान्तिरिति भेदः। कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते। ध
र्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते। कुतोप्याकारादिंगिताद्वा। यथा। वक्त्रस्यन्दिस्वेदबिंदुप्र
बंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे। पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पाणौ खड्गलेखां लि
लेख। अत्राकृतिरिमा लोकेन कयापि विदितं तर्कितं पुरुषायितमस्मि लेखालिखनेन वैदग्ध्यादभिव्य
क्तीकृतं नीतं पुंस्त्वमेव कृपाणपालितायोग्यत्वात्। इंगितोदाहरणं तु संकेतकालमनसमित्या
[illegible]। उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः। परः पर्यंतभागोऽवधिर्यस्य। धा

१

राद्धिश्लेषो हि नोक्तस्तथात्वेऽप्यलङ्कारस्यापि विश्रान्तेः। यथा। ... नन मन्मथ श्रवणाभवनाकरदवर्जितं दुग्धं। करदलं नन्दनं का
रस्यदलं कारशब्दराकारः। समाधिः सुकरं नाम करणान्तरयोगतः। सुकरं सुकरत्वेन विवक्षितमित्य
र्थः। यथा। मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं। समं सम
अथ न्तयाप्योपीणा ... सम्भावितः क्वचित्। यमनयोर्यान्नरुचितमित्यध्यवसानं चेत्तदा समनामालङ्कारः। हृदय
योगं अ ... के। निशाशशांके शिवयागिरीशं श्रियाहरिं योजयतः प्रतीतः। विधेरपि स्वा
रसिकः प्रयासः परस्परं योग्यसमागमाय। सुमहद्धि चित्रमेतन्मुञ्चिरचने विधिर्भवतु दः। आस्वाद्य
निंबफलं ... स्य यदास्वादकः काकः। क्वचिदपि यदतिवैधर्म्याल्लम्बे योघटनामियात्। कर्तुः क्रियाफ
लं नेवानर्थः स विषमो द्विधा। द्वयोरत्यन्तविलक्षणतया यदनुपपद्यमानतयैव योगः प्रतीयते यश्च
किंचिदारभमाणः कर्ता क्रियायाः प्रणाशात्तेनकेवलमभीष्टतत्फलं लभते। यावदप्यार्थितम
नर्थं प्राप्नोति स द्विरूपो विषमः। क्रमेणोदाहरणं। शिरीषादपि मृद्वंगी क्वेयमायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः। सिंहिकासुतसंत्रस्तः शशः शीतांशुमागतः। ग्रसे साभ्य
साम्यवतं ... सनन्यः सिंहिकासुतः। सहतोयं न्महीसा पूर्वां वाश्रितामयोः क्रमात्। आश्रयाश्र...
यिणोरनयोस्ताः तन्वभ्यधिकं तु यत्। आश्रिताश्रयपोर्महतोरपि विपर्ययेतदपेक्षयातनुत्वमाश्रय
यिणोरनयोस्तत्रानुस्तपकर्षवस्तुविवक्षया। यथा। अहो मन्दधिकता ब्रह्मतः। तदिदं द्विविधमधिकं। क्रमे
णोदाहरणं। अहो विशालं भूपाल भुवनत्रितयोदरं। माति मातुमशक्योपि यशोराशिर्यदत्र ते। युगान्तकालप्र

५२

पर ॥५२॥

॥५२॥

के ५ वं २ न ७ प ६

ति संहतात्मनो ऽनंगं तिर्यस्यां सविकाशमासत. तनोऽमप्युक्तत्र नकैटभद्विपक्षपोषणाभ्यागमसंभवानु
दः॥ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया॥ या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते. प्रतिपक्षं तिरस्क
र्तुमित्यन्वयः॥ तत्स्तुत्यै प्रतिपक्षस्तुत्यै. यथा. त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता। पं
चभिर्युगपदेव शरैस्तां ताडयत्यनुशयादिव कामः॥ विधीयते यद्वस्तु सजातीयोपलंभनैः तिरस्करणम
न्यस्य तन्मीलितमिति स्मृतं. तथा च बलवत्सजातीयग्रहणेन तदग्रहणमेवाभिभवस्तदेव मीलितमि
ति मंतव्यं. यथा. मल्लिकामालभारिण्यः सर्वांगीणार्द्रचंदनाः. क्षौमवत्यो न लक्ष्यंते. ज्योत्स्नायामभिसा
१०७ रिकाः॥ स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परं. विशेषणतया वस्तु यत्र सैकावली द्विधा. पूर्वं पूर्वं प्र
ति यत्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन स्थापनं निषेधो वा सा द्विधैवैकावली. क्रमेणोदा.
पुराणि यस्यां सवरांगनानि वरांगना रूपपरिष्कृतांग्यः॥ रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः
कुसुमायुधस्य. न तज्जलं यन्न सुचारुपंकजं न पंकजं तद्यदलीनषट्पदं. न षट्पदोऽसौ न जुगुंज
यः कलं न गुंजितं तन्न जहार यन्मनः॥ पूर्वत्र पुराणां वरांगनास्तासामंगविशेषणमुखेन रूपं तस्य वि
लासास्तेषामस्त्रममुना क्रमेण विशेषणं विधीयते. उत्तरत्रानिषेधेऽप्येवमेव बोध्यं॥ यथानुभवम
र्थस्य दृष्टे तत्सदृशे स्मृतिः॥ स्मरणं. यथा. निम्ननाभिकुहरेषु यदंभः प्लावितं चलदृशां लहरीभिः. तद्
भवैः कुहकुहैः सुरनार्यः स्मारिताः सुरतकंठरुतानां. भ्रांतिमानन्यसंवित्तत्तुल्यदर्शने. यदि तन्यदि तत्प्रा
ः कुहकुहैः सुरनार्यः स्मारिताः सुरतकंठरुतानां. अन्यस्यान्यतया संवेदनं व्यधिकरणप्रकारकं ज्ञानं भ्रांतिमानित्य
करणि कनिर्दिष्टं ...

र्थः॰ तथा चानुस्यूतस्यानारोपरूपस्य स्वात्मन्याजं कारस्यापि त्रैवान्तर्भावः॰ यथा॰ वेत्रत्व वा
लुञ्चरूचां वधनां करणं प्रतोतं च तज्जातता न॰ मंगलः सह हेलं यदि नापतिष्यन्को वेदपिष्यन्ते व
त्वं प्रकाशितिः॰ अजं निर्मितां तरजनितापि नानात्वप्रतीतिः॰ प्रथमप्रतीतमभेदं न स्युदयितुमु
त्सहते॰ साक्षात्कारिप्रमे साक्षात्कारिविशेषदर्शनं विरोधीतिन्यायात्॰ न चेदं रूपकं प्रथम
तिशयोक्तिर्वा॰ तयोरारोपितोपरूपत्वात् अस्य त्वनाहार्यत्वात्॰ यथा भामधर्मिणि न नमेदं वंमहः
प्रक्ष्यसंन्तमनवशाद साध्वसः॰ वीतिहोत्र इति गोहिनी स्तनौ नाव कर्ष कलशीधिया ध्वगाः॰ विना
प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः॰ एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा॰ अन्यत्प्रकु
र्वतः कार्यमशक्यस्यान्यवस्तुनः॰ तथैव करणं चेति विशेषस्त्रिविधस्मृतः॰ एकात्मा एक
स्यभावः॰ तथा वेकस्मेव वस्तु एकेन स्वभावेन युगपदनेकत्र वर्त्तत इत्यर्थः॰ तथैवेति॰ तेनैव
प्रकारेणेत्यर्थः॰ क्रमेणोदाहरणं॰ दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां॰ रमयंति
जगंति गिरः कथमिव कवयो न ते वंद्याः॰ सा वसइ तुह हियए अह सञ्चित्र अअच्छीसु सा अ वअणे सु॰ अ
म्हारिसाण सुंदर ओआसो कत्थ पावाण॰ स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यवि
द्य॰ विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता दिवः स्वतिश्च॰ समुल्लसज्योत्स्नगुणां वोमादनु ज्व
लद्गुणस्याय तु॰ त्वस्फुतकृणतामेतिमण्यतेमनुतस्कृणः॰ समुल्लसत्स्वेति॰ अत्र स्वगुणरिरस्कार
वस्वगुणस्यागः॰ प्र यथा॰ विधिनिन्नवर्णागरुत्रग्रजेन सूर्ये स्वारध्याः चरितस्फुरत्स्या॰ रत्नैः पुनर्यो

॥५३॥

॥५३॥

53

त्ररूपत्वं च वा स्यात्सानित्ययोरेवं शब्दशरीरनीतेः। तद्रूपाननुकारभेदस्य तत्त्वादतद्गुणः। अस्या
अहेतल्लक्षणानन्नुकारः। अस्योदाहरणं। यथा। गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते। तेषां संसृष्टिरेतेषां भेदेनैकत्र यास्थि
तिः। एतेषामलंकाराणां भेदेनान्योन्यनिरपेक्षतया शब्दमात्रग एवार्थमात्रग
एव उभयत्र वा पर्यवसानं संसृष्टिः। तत्र शब्दालंकारसंसृष्टिर्यथा। तारतारतरैरितो
दि। अर्थालंकारसंसृष्टिर्यथा। लिंपतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसे
वेव दृष्टिर्विफलतां गता। पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः। प
रत्र तु तथाविभेद उपमोत्प्रेक्षे। शब्दार्थालंकारयोः संसृष्टिर्यथा। हिंदोलिकेयमिंदोः क
लिकेव कादोऽनुप्रासो रूपकं च संसृष्टिं प्रयोजयतः। अविश्रान्तिजुषामात्मन्यंगांगित्वं तु सं
करः। तेषामलंकाराणामात्मनि आत्मनात्मा अविश्रान्तिजुषां चमत्कारेऽन्यापेक्षणं। अंगांगि
त्वमनुग्राह्यानुग्राहकत्वं तद्रूपः संकरः। इत्यर्थः। इतरविजातीयासहकारेण चमत्कारका
रित्वं विश्रांतिः। एतेन संसृष्टेर्भेदो दर्शितः। यथा। शोणं बिंबोष्ठकांत्या त्वदरिमृगदृशामि
त्वरीणामरण्ये [illegible] जातकानां नाम जडिति शवरा नैव हारं हरंति। अत्र तद्गुणमपेक्ष्य भ्रां
तिमतामान्निमत्तं तदगुणः। चेतद्गुणः। भ्रान्तिमच्चमत्कारनिमित्तमित्येतयोरंगांगिभावः।
एवंरूपश्चैकसंकरः। शब्दालंकारयोरपि दृश्यते। उदाहरणं स्वयमूह्यं।

५४

॥५४॥ ना

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः। एकस्य। एकतरस्येत्यर्थः। न्यायदोषौ साधकबाधक-
प्रमाणे। तथा हि एककाव्ये द्वयोर्बहूनां वालंकाराणां समावेशसंभवत्वेप्येकतरस्यापि परिग्र-
हे साधकबाधकप्रमाणाभावात्संशयः संदेहसंकर इत्यर्थः। यथा। नयनानंददायीन्दोर्बिंब-
मेतत्प्रसीदति। अधुनापि निरुद्धाशमविशीर्णमिदं तमः॥ अत्र किं कालस्योद्दीपकः कालो वर्ण्य-
तद्द्युतिभंग्यन्तरेण कथनात्पर्यायोक्तं उत तदाननस्येन्दुबिंबतयाध्यवसानादतिशयोक्तिः।
किमेतदिति वक्तुं निर्दिश्यत इत्युपायोप[illegible]कमित्यादि बहूनां संशयादयमेव संकरः। यत्र पुनः
सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिरित्यादौ हासद्युतिवक्त्र एव संभवत्यु-
पमायाः संभवो न रूपकस्य। तथा। पादांबुजं जयत्यस्या मंजुमंजीरसिंजितमित्यत्र मंजी-
रसिंजितमंबुजे नास्तीति रूपकस्य बाधः। उपमायास्तु संभव इति न तत्र संदेहसंकरः। एव-
मन्यत्रापि भाव्यं। स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयं। व्यवस्थितं च। एकस्मिन्नेव पदे
स्पष्टतया यद्भावविशब्दार्थालंकारौ व्यवस्थां भजतः सोप्यपरः। यथा। स्पष्टोल्लसत्कि-
रणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथो दिवसारविंदं। श्लिष्टाष्टदिग्दलकलापमुखा-
वतारबद्धांधकारमधुपावलि संचुकोच। अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ। तेनासौ त्रिरूपः
परिकीर्तितः। तदयमनुग्राह्यानुग्राहकतया। संदेहेनैकपदप्रतिपाद्यतया च व्यवस्थितत्वात्
त्रिरूपतया संकरः कथितः। अत्रेदमवधातव्यं। न सहते समशब्दस्यालंकारः। यत्र नो तथा सोपि

[illegible]शः परिच्छेदः

॥५४॥

लंकारः॰ यत्र तु केचन शब्दाः परिवृत्तिं सहंते केचिन्न न सहंते स उभयालंकारः॰ यथा पुनरुक्त
वदाभासः परंपरितरूपकं च॰ अथैषामलंकाराणां दोषाः॰ अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं
वृत्तिविरोधश्चेति त्रयो दोषाः॰ यथा॰ अर्चनेन तव दिव्यवर्चसा स्पंदनेन पदमैंद्रमृच्छति॰ वंदने
न तव शैलनंदने नंदने च जननं यथा नंदति॰ अत्रार्चनादिनैंद्रपदलाभादिफलमनुप्रासा
नुरोधेनैव प्रतिपादितं॰ न तु पुराणादिषु तथा प्रसिद्धिरिति प्रसिद्धिविरोधः॰ तथा॰ उर्व्यसावत्र
तर्वाली मर्वते चार्ववस्थितिः॰ नात्रर्ज्जु शक्यते गंतुं शिरो मे यतन्मनाक्॰ अत्रानुप्रासेन विवि
च्यमानेन न किंचिदपि चारुत्वं प्रतीयत इत्यनुप्रासस्य वैफल्यं॰ तथा॰ अकुंठोत्कंठया पूर्णमि
त्यादौ श्रृंगारे गौडीवृत्तिर्विरुद्धेति वृत्तिविरोधः॰ एवं यमकस्य पादत्रयगतत्वेन यमने दोषः॰
यथा॰ सदानवरिपुं शंभुं सदानावेविविजितोर्थीः सदाध्यायन्हृतार्थः स्यात्सदाहंकारवर्जितः॰
उपमायामुपमानस्य जातिपरिमाणतो न्यूनत्वमधिकत्वं च दोषः॰ तथा साधारणधर्माभि
तमधिकत्वं न्यूनत्वं च दोषः॰ क्रमेणोदाहरणानि॰ चांडालैरिव युष्माभिः साहसं परमं कृतं॰ व
ह्निस्फुलिंग इव भानुरयं चकास्ति॰ अयं पद्मासनासीनश्चक्रवाको विराजते॰ युगादौ भगा
वान्वेधा विनिर्मित्सुरिव प्रजाः॰ अत्रांत्येनोत्कृष्टस्योपमानीकरणमपकृष्टस्योपहास
एव पर्यवस्यतीति दोषताभिधानमधिकं स्यादिति भावनीयं॰ पातालमिव नाभिस्ते स्तनौ क्षि
तिधरोपमौ॰ वेणीदंडः पुनरयं कालिंदीपातसंनिभः॰ अत्र चांडालादिभिरुपमानैः प्रस्तुतो

यौऽयं तं कदर्थितं इति दुष्टत्वं । समुन्निद्रौ द्विजितो ... जिनपदं वहन् । विरेजे नीलजीमूत मा
लिह इव अंशुमान् । अत्रोपमानस्य मौञ्जीस्थानीयस्य ... हेतुलक्षणो धर्मः केनापि पदेन न प्रतिपादित इति
न्यूनत्वं । सपदि ... गृहीतशार्ङ्गस्य ... शरदि दादुधवलायां निशायां संसज्य
मानः शशिनेव मेघः । अत्रोपमेयस्य ... इति । तथोपमा
यामुपमानोपमेययोर्लिङ्गवचनभेदो दोषः । साधारणधर्मस्यैकमात्रगतत्वेऽप्रतीतेः । यथा । चिन्तार
त्नमिव ... करतोऽधिगतं दुर्लभं समे । यथा वा । ... तारा जनन्नुत्पुष्पाः कुलवधूरिव । अ
त्र नानात्वे ... लिङ्गवचनयोः साधारणधर्मो नैकमात्रगामी भवति तत्र नायं दोषः । यथा । गुणैरन
घैः प्रथितो रत्नैरिव महार्णवः । तथा । तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरतामतः । दधते स्म परां
शोभां तदीयविभ्रमा इव । तथोपमायां कालपुरुषविध्यादिभेदा अपि दोषाः । उद्देश्यप्रतीतेरस्खलि
तरूपत्वादविघ्नितेरभावात् । यथा । अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती । पश्चिमा यामि
नीयामात् प्रसादमिव चेतना । अत्र चेतना प्रसादमाप्नोति न पुनराप इति कालभेदः । यथा । विभ्राजसे
मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा लतेव । अत्र लता विभ्राजते न तु विभ्राजसे इति पु
रुषभेदः । तथा । गाङ्गेव प्रवहन्तु ते सदैव कीर्त्तिर्दिव्या दोगांगा प्रवर्त्तते न तु प्रवहन्तु इत्यत्र प्रवर्त्तता
मिति विधिभेदः । एवमनुपमायामसादृश्यमसंभवश्च दोषाः । स्फुटमुदाहरणम् । उत्प्रेक्षाया
मपि संभावनं ध्रुवादयः एव शब्दा वाच्यं ... न तु यथाशब्दोऽपि तत्र न तु पादाने दोषः । यथा ।

२५

॥२५॥

॥२५॥

55

उध्यो [illegible] र्धि का [illegible] न्मुकुलं मे च कोत्पलं। नारी लोचन चानुर्यसंकुचितं यथा। एवं साधारण विशेष
[illegible] वदेव समासोक्तिरनुक्तमप्युपमान विशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने दोषः। यथा। स्य
[illegible] चोलकुंभः करैर्दधित येववि[illegible] मितताप या। अतनुमान परिग्रह या स्थितं रुचिरया वि
[illegible] दिव [illegible] या। अत्रातिमरुचेः कुंभां च यथा सदृशा विशेषण बलेन व्यक्ति विशेष परिग्रहे
[illegible] व्यक्तिः। तथा ग्रीष्मदिवसश्रियोपि प्रतिनायकत्वं भवितुमर्हतीति किं दधित
[illegible] पादानेन। एवमप्रस्तुतप्रशंसायामपि उपमेयमनपेव[illegible] प्रतीतं न पुनः प्रयो
[illegible] [illegible] उदाहरणं तु स्वयं बोध्यं। एवमन्यदप्यूह्यं। एतान्दोषाननुक्तदोषेषु केचिदंतर्भा
वयं [illegible] लेशइत्युपरम्यते॥ ॥उदंचन्न[illegible] [illegible] मतिरेकान्त सुभगां भवितः
[illegible] मधुपः॥ ॥ [illegible] बंधं निबंधादिमयीनितरां वृत्ति लहरीयशीरं भा
[illegible] ॥१॥ [illegible] चर्चीरलेखा विविधवि
[illegible] ॥ कंठेसतां [illegible] श्रीवत्सलांछन कवेर्वचसां विलासः॥२॥
[illegible] तं श्रीमांस्सा[illegible] तैवसकलं पातं च पातं ज
[illegible] श्रीवत्सस्य हृतिः सुधापरिणतिस्तस्येयमु
[illegible]॥ वैदांतार्थविचारनामनै [illegible]
[illegible] ॥ ॥छ॥ ॥ ॥ [illegible] ॥ ॥ इति श्री श्रीवत्सलांछन॥ ॥छ॥॥॥छ॥श्री॥

महाचार्याभिरचितायां कोवापी [illegible] च समंतु [illegible]स: ॥ ॥ छ ॥ ॥ ॥

[illegible] ॥ श्री ॥ ॥ ॥ संवत् १९६६ पिं ॥ [illegible] सं [illegible] दस्यों [illegible]

[illegible] तं [illegible] नमस्का ॥ छु ॥ [illegible] ॥ छु ॥ ॥ श्री [illegible] नम: ॥ ॥ छ ॥ ॥ राम ॥ ॥ छ ॥

२२०८





॥ राम ॥

॥ ५५ ॥